Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सरकारी पो·क्र·२ सं१९४२ दा·।=

P12651
27-8-01

આ. શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર, કોબા, ગાંધીનગર
P १२६५५८

# कुण्डसिद्धीप्रारम्भः

॥श्री यहकुण्डसिद्धि महह्मा ढुंढिराजगणेशके पास दाऊजी अग्निहोत्रीके सिद्ध विनायक यंत्रमे वहुत शुद्ध करके छापा· जिसिलेना होय ढुंढिराजगणेशके पासदाऊजीके दुकानपर मिलैगी मि॰ चैत्र कृष्ना ७ सं॰ १९३५ शुभमस्तु ॰॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

97693



॥ श्रीगणेशायनमः॥ मत्तमतंगजवदनं साहित्तविद्यावलीसदनं गौरीहरयोस्तोकं पालितलोकं हृदालंबे १ कल्याणि
वाणि निजपाणिसरोजयुग्मं संयोज्यदेविकरवाणितवप्रणामं सत्तुंडमंडलल्लसद्रसनांगणांते नृत्यायनित्यमिदमस्तुर ।
सानुसिक्तं २ संतानकल्पतरुमंडपमंडितायांकुंडोल्लसज्ज्वलनकांचनवेदिकायाम् सीतारघूद्वहकराकलितैकपाणि
वैवाहहोमसमयेदिशताच्छुभानि ३ कुंडमंडपसंसिद्धेर्विहृतिंलिखितोक्तिषु प्राचीनवाक्यसंदर्भसंदर्शयितुमारभेत ४
इहजगतिशिष्टाग्रंथारंभेस्वेष्टदेवतानमस्कारादिरूपंमंगलमाचरंति तस्मान्माध्यंदिनीयोविठ्ठलदीक्षितशर्माकुंडसि
द्धिंचिकीर्षुः॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

२ स्वाभीष्टदेवतास्मरणमाशीरूपंमंगलमाचरति शार्दूलविक्रीडितेनाह स्मेरः सहासः शिवः वः युष्मान्पातु किंविशिष्टः शिवां
गौरीमितिवदन् हेगौरीदमाश्चर्यंकौतुकंपश्याऽवलोकय आश्चर्यमेववर्णयति अनेकभानुजठरे अनेकसूर्योदरे गाढनि।
विडंध्वांतमंधकारंपश्येत्येतन्मिषेणगौरीमस्तकस्यरत्नखचितस्वर्णमुकुटांतर्वर्तिनीलालकवर्णनं अन्यच्च राजत्कलाधा
रिणीबिलसत्पूर्णचंद्रेप्रोदंचच्छफरीयुगं अतिचंचलमत्स्ययुगं एतद्व्याजेनगौरीमुखचन्द्रस्यचंचलनयनयुगलवर्णनं॥

गाढंध्वांतमनेकभानुजठरेराजत्कलाधारिणिप्रोदंचच्छफरीयुगंदलदलत्पद्मेऽणुहीरावलिः स्वर्णोत्तुं
गगिरिद्वयाधरचरीक्षीणांकलिंदात्मजांपश्याश्चर्यमिदंशिवामितिवदन्स्मेरःशिवःपातुवः॥ १ ॥

अन्यच्च दरदलत्पद्मेईषद्विकसितकमलेअणुहीरावलिः लघुवज्रखंडपंक्तिःएतद्व्याजेनगौर्याईषद्धास्यवदनांतर्वर्ति
दंतपंक्तिवर्णनं स्वर्णोत्तुंगगिरिद्वयाधरचरीदिनाकलिंदात्मजा कनकात्युच्चमेरुपर्वतद्वयायोगामिनीकृशायमुनेत्येत
द्व्याजेनगौरीपृथुतुंगकुचयुगुलतटाधरचारीरोमावलीवर्णनं यथाश्रुतेर्थेविचार्यमाणेऽसंबधादाश्चर्यमिति ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथस्वस्व्यपूर्वकंग्रंथनामोपजातिछंदसा प्रतिजानीतेस्पष्टोर्थः २ अथकुंडमंडपादिविवक्षस्तावद्धस्तादिपरिभाषांविपरीता
ख्यानिकयनुष्टुक्यामाह ॥ कृतावूर्ध्वौवाहूयेनतथासमभुविसमपादतयास्थितस्यवाप्रपदंपादाग्रंतेनभुवमालंब्योच्छ्रित
स्यकर्तुर्यजमानस्ययः पंचमांशः सहस्तः तस्ययोजिनांशकः चतुर्विंशांशः तदंगुलंतत्तद्विभांशकाः तस्यतस्यांगुलादेर्येद्व
भांशकः ३ अष्टमांशाः तेयवः यूकालीक्षावालाग्रएवमादयोरथरेणुप्रभृतयोभवंति एतदुक्तंभवति अंगुलस्याष्टमांशो

कृष्णात्रिगोत्रेनितरां पवित्रेपवित्रकर्माऽजनिवूवशर्मा तत्सूनुनाविठ्ठलदीक्षितेनविरच्यतेमंडप
कुंडसिद्धिः २ कृतोर्द्ध्ववाहोः समभूगतस्यकर्तुः शरांशः प्रपदोच्छ्रितस्य योवासहस्तोऽस्यजिनांशकोपि।
स्यादंगुलंतत्तद्विभांशकाये ३ यवोयूकाचलिक्षाचवालाग्रंचैवमादयः ॥ * ॥ * ॥ * ॥

यवः तस्याष्टमांशोयूकातस्याअष्टमांशोलीक्षातस्याअष्टमांशोवालाग्रं तदष्टांशोरथरेणुः तदष्टांशः त्रसरेणुः तदष्टांशः परमाणुः
रितिकृतमुष्टियजमानहस्तोरत्निः सएकविंशत्यंगुलात्मकः सरत्निः अकनिष्टिकः मुक्तकनिष्टोअरत्निः ससार्द्धद्वाविंशत्यंगुला एमः
त्मकोहस्तएवअरत्निहस्तयोः प्रायोभेदएवेतिव्याख्यातकात्यायनः यजमानेनोर्ध्ववाहुनाप्रपदोच्छ्रितेनसमस्थितेनवेति। २

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथापंचारत्निः पुरुषोदशपदोद्वादशांगुलंपदमितितथा विंशतिशतांगुलः पुरुषइति अत्रसमस्थितेनप्रपदोच्छ्रितेनवेत्येवं
कात्यायनोक्तः श्रौतोविकल्पः यतः कल्पस्यसाक्षाच्छ्रुतिमूलकत्वांश्रुतिद्वैधंतुयत्रस्यात्तत्रधर्मावुभौस्मृतावितिसमस्थितेन
प्रपदोच्छ्रितेनेत्यैच्छिकोविकल्पः अथपंचरात्रादिषुआचार्यहस्तस्यकनिष्ठिकाद्येश्चतुर्भिरेवांगुलिभिर्ब्रह्मर्षेमध्यांगुलेर्मध्यम
पर्वभागेतिर्यग्विसर्पद्भिरियंतुमेयेतिअत्राचार्यमानमुपदिष्टंतत्राप्याचिनोत्यर्थान्कर्मफलरूपानितियास्कवाक्यबलाद्यपप
त्तिबलाच्चदानवाचनान्वारंभणावरणव्रतप्रमाणेषुयजमानंप्रतीयादितिकात्यायनवचनाच्चाचार्योयजमानएव अथस्मा

कृतमुष्टिःकरोरत्निररत्निरकनिष्ठिकः॥४॥

र्तेस्मिन्कर्मणिकथंश्रौतवाक्यावसरइतिनाशंक्यं यथाश्रौतेप्यग्निहोत्रादौसदोपवीतिनाभाव्यंसदाबद्धशिखेनचेत्याद्यवि
रुद्धंस्मार्तमंगीक्रियतेतद्वत्स्मार्तेयस्मिन्कर्मणिश्रौतंग्राह्यमेवेतिआदित्यपुराणेजालांतरगतेभानौयत्सूक्ष्मंदृश्यतेरजः प्रथमं।
तत्प्रमाणानांत्रसरेणुंप्रचक्षते॥ त्रसरेणुस्तुविज्ञेयोपेष्टौयस्युः परमाणवः त्रसरेणवस्तुतेह्यष्टौरथरेणुस्तुसःस्मृतः रथरेणवस्तुते
ह्यष्टौवालाग्रंतत्स्मृतंबुधैः वालाग्राण्यष्टलीक्षातुयूकालीक्षाष्टकंस्मृतं॥अष्टौयूकायवंप्राहुरंगुलंतुयवाष्टकं ॥ तत्रैवरत्नि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्त्वंगुलपर्वाणिविज्ञेयस्त्वेकविंशतिः अरत्निरकनिष्टः स्यात्षोडशांशवियुक्करः अरत्निरेवहस्तः श्रुतावनिहितः अरत्निंप्रकृत्यच॥
तुर्विंशत्यंगुलिभिः संमितइतिअन्यदंगुलादिमानंयत्तत्कार्येषुद्रष्टव्यम् ४ अथकुंडमंडपोपयोगिप्राचीसाधनंविवक्षुस्तदुपयो॥
गिनीमितिकर्तव्यतांस्रग्धरयाह पूर्वंप्रथमतोधरित्रींज्ञात्वाइयंभूमिर्ममकुंडादिकर्तुंयोग्याअयोग्येतिविचार्यततोदहनख॥
ननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैश्चसंशोध्यततोगुणिजनेनबुध्यावामुकुरजठरवदादर्शोदरवत्समांकृत्वाद्विजेंद्रैर्ब्रा
ह्मणेंद्रैः पुण्याहवाचयित्वाकूर्मशेषौक्षितिं अपिशब्देनवराहंपुष्पादिभिः समाराध्यपूजयित्वा शुद्धदिनेतिथौचकाराल्लग्न

ज्ञात्वापूर्वंधरित्रींदहनखननसंप्लावनैः संविशोध्यपश्चात्कृत्वासमानांमुकुरजठरवद्वाचयित्वाद्विजेंद्रैः॥

मंडपार्थंसुरपतिककुभः प्राच्याः साधनंकुर्यादितिव्याख्या यच्छारदातिलकेनक्षत्रराशिवाराणामनुकूलेशुभेहनिततोभूमिज
लेशुद्धेतुषांगारविवर्जिते पुण्याहंवाचयित्वातुमंडपंरचयेच्छुभमितिभूपरिक्षापंचरात्रे तत्रभूमिंपरीक्षेतवास्तुज्ञानविशारदः
स्फुटिताचसशल्याचवाल्मीकारोहिणीतथा दूरतः परिवर्ज्याभूः कर्तुरायुर्धनापहा ईशकोणप्लवासाचकर्तुः श्रीदासुनिश्चि
तंपूर्वप्लवावृद्धिकरीवरदाततरप्लवा शेषकाष्ठाप्लवाभूमिर्धनायुर्गृहनाशिनी ब्राह्मणीघृतगंधास्यात्क्षत्रियारक्तगंधकृतक्षा



For Private and Personal Use Only

४ रगंधाभवेद्वैश्याशूद्राविट्गंधिनीक्षितिः ब्राह्मणीभूः कुशोपेताक्षत्रियाशरसंकुलांकुशकाशाकुलावैश्याशूद्रासर्वतृणाकुला
अनिषिद्धयथाकुंडसर्वस्वं सितापीतातथारक्ताकृष्णवर्णासमन्विता स्थिरोदकादृढास्निग्धाभूमिःसर्वसुखावहा शीतस्पर्शो
ष्णकालेयावन्हिस्पर्शोहिमागमे वर्षासुचोभयस्पर्शासाशुभापरिकीर्तिता हयग्रीवपंचरात्रोक्ते सुंदरीणांरतिर्यत्रपुरुषैः सह
स्तमाकाश्मीरचंदनामोदकर्पूरागरुगंधिनी कमलोत्पलगंधाचजातीचंपकगंधिनी पाटलामल्लिकागंधानागकेसरगं
धिनीं दधिक्षीराद्यगंधाचमदिरासहगंधिनी सुगंधित्रीहिगंधाचशुभगंधयुताचया सर्वेषामेववर्णानांभूमिःसाधारणीमता
कुसमप्रकरस्तहृद्यस्यानम्लानिमृच्छतिननिर्वानितथादीपस्तोयंशीघ्रंनजीर्यते मधुराचकषायाचअम्लाचकटुकातथाकुशै
ःशरैस्तथाकाशैर्दूर्वाभिर्याचसंभृतेति प्रयोगसारेवितस्तिमात्रविस्तारंनिर्मायविवरंभुविनिक्षेपत्तामृदस्तस्मिन् स्तासुशिष्टा
सुशोभनं समासुमध्यमंविद्यान्न्यूनास्वधममुच्यतेपरीक्ष्येवंप्रयत्नेनत्यक्त्वाभूमिंकनीयसां अंगारतुषकेशादिहीनंकृत्वातुभूत
लं वासिष्ठ्यांखन्यमानेयदाकुंडेपाषाणःप्राप्यतेभुवितदापमृत्युर्वेचास्थिकेशांगारैर्धनक्षयः भस्मनाचभयंप्रोक्तंतुषैः प्रोक्ता।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुं·सि दरिद्रतेति शल्यज्ञानंमहाकपिलपंचरात्रे प्रासादारंभकालेचगृहादौचविशेषतः शल्योद्धारस्तुकर्तव्योयदिच्छेच्छुभमात्मनः
४ प्रासादारंभकालेतुयदंगंस्पृश्यतेपुमान् वास्तुदेहेदृढंतत्र शल्यंविद्याद्विचक्षणः कंडूयतिशिरःपुंसिशिरः शल्यंसमुद्धरेत् श॥
ल्यंतत्रास्थिविज्ञेयंखन्यमानेकरत्रये अग्निदाहश्चचरणेधनहानिश्चजायते यत्नेनोत्पाटयेच्छल्यंयदीच्छेच्छुभमात्मनः वा
हूकंडूयमानेतुनिर्दिशेल्लोहशृंखलां हस्तद्वयेनसंतिष्ठेल्लक्षणंगदितंतव स्वामिनोमरणंविद्याद्विदेशगमनंतथा यत्ने नो
रूकंडूयमानेतुकाष्ठयशल्यंविनिर्दिशेत् हस्तेनैकेनसंतिष्ठेल्लक्षणंगदितंतव असतीचभवेद्भार्यायशोहानिश्चजायते यत्ने
हस्तौकंडूयमानेतुकंकालंचविनिर्दिशेत् त्रिहस्तेनचसंतिष्ठेत्खन्यमानेनचान्यथा अग्निदाहश्चरोगश्चसशल्यंमरणंभवेत्।
पृष्टंकंडूयमानेतुवाहुशल्यंविनिर्दिशेत् सार्द्धहस्तेनसंतिष्ठेन्नात्रकार्याविचारणा स्वामिनाशोभवेत्तत्रभार्यावाजायतेसती
पादौकंडूयमानेतुहस्तशल्यंविनिर्दिशेत् सार्द्धहस्तेनसंतिष्ठेल्लक्षणंगदितंतव गोनाशोराजदंडश्चसस्यहानिश्चजायते कु॥
क्षौकंडूयमानेतुपाषाणंतत्रनिर्दिशेत् हस्तद्वितयमानेनल० भुजंगदंशस्तत्रस्यात्तस्माच्छल्यंसमुद्धरेत् कर्णौकंडूयमानेतु। एषः
भस्मतत्रविनिर्दिशेत् हस्तद्वयेनसंतिष्ठेल्ल· अग्निदाहोमनस्तापः क्लेशदुःखभयानिच करोत्येवंविधं ॥ ० ॥ ० ॥ ४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

P.12651

५ कर्मतस्मात्तद्देसमुद्धरेत् गोश्रृंगंपीतमंडूकः शंखः शुक्तिश्चकच्छपः कंबुकश्चप्रशस्ताः स्युर्याश्चान्यारत्नजातयः अंगारंवैतुषं।
केशमस्थिशल्यंविचारयेदिति वास्तुदेहज्ञानेसोमशंभो जानुनीकुर्परासक्ते दिशिवातहुताशयो पैत्र्यांपादपुटौनाड्यां शिरो।
स्यहृदयेंजलिरिति इदमभीष्टभूमौनवकोष्टंचक्रंविधायद्रष्टव्यं अन्येपिभूमिशोधने हाहादयः प्रकाराः स्मृत्युक्ताःअनुसं
धेयाः विस्तरभयान्नात्रलिख्यंते हयशीर्षपंचरात्रे भूमिंतोयसमांकृत्वादर्पणोदरसंनिभांमिति तत्प्रकारस्तुसकाष्टपट्टिंचतु।

पुराणयाहंकूर्मशेषोक्षितिमपिकुसमाद्यैः समाराध्यशुद्धेवारेतिथ्यांचकुर्यात्सुरपतिककुभः साधनंमंडपार्थे
५ नृपांगुलैः संमितकर्कटेनसूत्रेणवावृत्तवरंविलिख्यरव्यंगुलंशंकुममुष्यमध्येनिवेशयेत्त्वाक्षिमितांगुलीभिः

रंगुलोच्चांहस्तायतामंगुलविस्तृतांच कृत्वांतरंकाष्टमुलंवकोंकाद्यतस्ततः पूरयसन्मृदाकुमितिमत्स्यपुराणेवराहंकूर्मशे
षौचक्षितिंचैवविधानतः पूज्ययेद्वास्तुकार्येषु विधिनासाधकोत्तम इति ५ अथशंकुसमत्वसाधनंस्थूलप्राचीसाधनंचोपजातिवि
परीताख्यानिकीभ्यामाह षोडशांगुलैः परिमितनकर्कटेनसूत्रेणवावृत्तंविलिख्यतन्मध्येद्वादशांगुलंशंकुंदृढंसूक्ष्माग्रंस्थापयेत् की
दृशंविंशत्यंगुलपरिमिताभिः ॥ ६ ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतस्रभिः ऋजुभिः समानाभिः शलाकाभिः कल्पितचतुर्दिगातवृत्तेरेखास्थभिः संस्पृष्टमस्तकं एवं शंकुसमत्वं साधयित्वा तादृशस्पर्शो।
कोच्छाया पूर्वापराह्णे यत्र यस्मिन्प्रदेशे वृत्ते प्रविशति यत्र चापरापराह्णे वृत्ताद्बहिर्येया तत्र चिन्हयोः क्रमात प्रतीची प्राची भवत इति व्या
ख्या तत्र सार्द्धश्लोकस्योपपत्तिः ततद्दोः कोट्योर्नामभेदो न स्वरूपभेद इति दोः कोटिवर्गयोगपदं कर्ण इति शंकुतला दुत्तरेखां याव
न्नीयमानं सूत्रं कोटिः १६ शंकुभुजः १२ एतत्कृत्योर्योगपदं कर्णः २० वृत्तपरिधिस्पृष्टदिगंताछंकग्रं यावन्नीयमानाश्चतस्रः
शलाकाः कर्णा भवंति कुंडसर्वस्वशुल्वे समे शंकुं निखाय शंकुसमितया रज्ज्वा मंडलं परिलिख्य यत्तुरेखयोः शंकुग्रच्छाया निपतति

चतस्रभिश्चापि ऋजूत्तमाभिः संस्पृष्टशीर्षं तु समेषिकाभिः तच्छंकुभा यत्र विशेदपेयाद्वृत्ते क्रमात्तो वरुणे
(( द्रकाष्टे ॥७॥

तत्र शंकुं निहंति सा प्राचीति अत्र शंकुसंमितयोत्युपलक्षणं तेनाधिकयापि रज्ज्वा वृतं कार्यं अन्यथा पक्ष
भा षडंगुला तत्र धनुः संक्रांतौ द्वादशांगुलशंकोः छायाप्रवेशस्तादृशो वृत्ते न स्या देवतस्मादस्माभिः षोडशांगुलसूत्रेण वृत्तका
रितः तथा वृत्ते कृते लाघवंच एकेनैव वृत्तेन शंकुसमत्वसाधनं दिक्साधनंच सिध्यति अतएव रामः शंकुमानाधिक।
व्यासदले वृत्ते विशेष्यत इति ॥ ७ ॥ ह ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

६ एवंस्थूलंप्राचीसाधनंकृत्वासूक्ष्ममपिशालिन्याह साप्राचीकर्कसंक्रांतौकीटेवृश्चिकसंक्रांतौगोमृगेवृषभमकरसंक्रांतौ ए
कयायूकयाचाल्यासूर्यस्यायनवशात् उत्तरायणेउत्तरतः दक्षिणायनेदक्षिणतः एवंसिंहकन्यातुलासंक्रांतौकुंभमीनमे
षसंक्रांतौचद्वाभ्यांयूकाभ्यांचालनीया अयनवशात् द्वंद्वकार्मुकेमिथुनधनुःसंक्रांतौचालनंनास्तीतिव्याख्या अत्रवृत्तं।
भःसुसमीकृतेक्षितिगतेकेंद्रस्यशंकोः क्रमाद्भाग्रंयत्रविशत्यपैतिचततस्तत्रापरेद्वौदिशौ तत्कालापमजीवयोस्तुविवरा।

कर्केकीटेगोमृगेयूकयासाद्वाभ्यांचाल्यासिंहकुंभत्रिकेपि यांवैकाष्ठांभानुमान्यातितस्यांचाल्याद्वंद्वेका
र्मुकेनोचालनंन ८ रज्जुंद्विघ्नांमध्यचिन्हांसपाशांप्राचीशंकौपश्चिमेचापिदत्वाकर्षेद्धीमान्दक्षिणेचोत्तरेच।

द्भाकर्णमित्याहताल्लंबज्याप्तमितांगुलैरपनदिशैयंद्वीस्फुटाचालिते ^१ तच्चिन्हेस्याद्दक्षिणोचोत्तरादिक् ॥ ९ ॥
तिसिद्धांतशिरोमणिमार्गेणेतिकर्तव्यतांविधायद्रष्टव्यमिति ८ एवंप्राचीप्रतीचीसाधनंकृत्वाथोत्तरदक्षिणयोःसाधनंशा।
लिन्याहकुंडमंडपादौयावान्विस्तारस्तद्विगुणानांकृतमध्यांकांउभयोरंतयोःपाशवतींरज्जुंइष्टव्यासांतेप्राचीप्रतीच्योर्नशंको
र्विन्यसेत् ततोमध्यांकेधृत्वारज्जुंदक्षिणेउत्तरेचाकर्षेद्विद्वान्कर्षांकेदक्षिणाउत्तराचस्याद्दितिव्याख्याअत्रस्पष्टायुक्तिरिति ॥ ९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथरात्रौदिक्साधनोपायंवसंततिलकेनाह अथवारात्रौश्रवणस्योदयेप्राची अथवापुष्यस्योदयेप्राचीअथवा कृत्तिकोदयेप्राची अ
थवासुराणांवह्निकिस्त्वष्टावायुस्तयोर्भेचित्रास्वात्यौतयोरंतरा लेप्राची अमुतः प्राचीतः पूर्ववत् पूर्वोक्तेनयथायाम्यां दक्षिणां
दिशं साधयेदिति व्याख्याशुल्वेकृत्तिकाश्रवणः पुष्यश्चित्रास्वात्योर्यदंतरं एतत्प्राच्यादिशोरूपंयुगमात्रोदितेपुराइति १० अ
थचित्रास्वात्योर्मध्येप्राचीत्युक्तंतन्मध्यस्यदुर्ज्ञेयत्वात्तदुपायमनुष्टुभाह एकयाशलाकयाचित्रंविद्वा अन्ययातादृशैवशलाक

निशिवाश्रवणोदयेदिगैंद्रीगुरुभस्योदयेनेऽथवन्हिभस्यसुरवर्द्धकिवायुभांतरालेप्यमुतः साधयपूर्वव
च्चयाम्यां १० चित्रांविध्वैकयास्वातीमन्ययापिशलाकयातिर्यक्स्थांतरचिन्हात्तुद्दिमूलेऽस्यात्स्फुटेंद्रदिक्
॥ ११ ॥

यास्वातींविद्धा तयोः शलाकयोरूपाग्रंदक्षिणोत्तरांमध्यांकांतृतीयां शलाकांसमतयादद्यात् प्रथमद्वितीय
योःशलाकयोर्मूले एकीकृत्यतृतीयामध्यांकाउभयसंपातंयावच्चतुर्थींशलाकांप्रांतेरज्जुप्रोतलंवकद्वयवंतीपूर्वापरायतांद
द्यात् तत्रयल्लंवकौभूम्यांपतितौतत्रांकयोः पूर्वापरसूत्रदानात्स्पष्टाप्राचीत्यत्रस्पष्टायुक्तिर्व्याख्यातेति ॥ ११ ॥ ॐ ॥ ॐ ॥ राम
६

॥श्रीरामचंद्रायनमः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथप्रकारांतरेणलघूपायेनोदीचीसाधनमाह तिथिपत्रात्गणिताद्वा दिनमानमेतावदितिज्ञात्वाततोघटिकादिनाज्ञातेदिनार्द्धम
ध्यान्हेसप्तांगुलशंकोर्यत्रछायाग्रंलगतितस्माच्छंकुमूलंयावन्नीयमानंसूत्रंदक्षिणोत्तरसूत्रमिति अथवासप्तांगुलशंकोर्गणि।
तागतमध्यान्हिकछायातुल्यातस्यैवछायायदास्यात्तदग्राच्छंकुमूलेनीयमानंसूत्रंदक्षिणोत्तरेति अत्रयुक्तिः तस्मिन्समयेरवि

परमदिनदिनोद्भवांतरालंशरगुणितंचहृतंरसैर्द्युतिःस्यात् समकुगतनरेनगां
गुलेत्विट्समगतयास्वभयाभवेदुदीची १२ दिनमानदलेसप्तांगुलछायाग्रतो
हितत् शंकुमूलेनीयमानंसूत्रंस्यादुत्तरादिशा १२ दिगंतशंकुद्वयगंद्विपाशंविस्ता
रतुल्यंतुगुणंदलांकैकोणेप्रकर्षेदितिवेदकोणेष्वेवंचतुःकोणमतीवसाधु॥१३॥

दक्षिणोत्तरवृत्तेभवतीतिततः पूर्ववत पूर्वापरेसाध्या १२ एतद्दिक्साधनविधायमंडपस्यचतुष्कोणत्वाच्चतुष्कोणसाधनः
विपरीताख्यानक्याहदिगंतयोः पूर्वदक्षिणयोः दक्षिणापरयोःअपरोत्तरपूर्वयोः शंकुद्वयगंद्वौपाशौयस्यतंविस्तारेणातुल्यंगु
णंसूत्रंअर्द्धचिन्हेधृत्वाकोणेआकर्षेदेवंचतुर्ष्वपिकोणेषुइतिकृतेसाधुचतुरस्त्रंस्यादिति ॥१३॥ छ ॥ छ ॥ छ ॥ छ ॥

For Private and Personal Use Only

अथमंडपेविशेषशालिन्याह मंडपस्यभूमिंहस्तोच्छ्रायामर्द्धहस्तोच्छ्रायावाकुर्यात्चेत्द्वितीयोमंडपः कार्योभवतितदामंडपप्रमाण
परिमितांभूमिंमध्येत्यक्त्वाद्वितीयोमंडपंकुर्यादितिव्याख्यायत्सिद्धांतशेखरे स्थूलादर्कांगुलोच्छ्रायंमंडपस्थलमीरितं कपिल
पंचरात्रेमंडपप्रकृत्योक्तं उच्छ्रायोहस्तमानंस्यात्तुसमंचसुशोभनं तेनविकल्पोज्ञेयः वास्तुशास्त्रेमंडपांतरमुत्सृज्यकर्तव्यंमं
डपांतरमिति १४ अथमंडपप्रमाणंवसंततिलकेनाह दशहस्तोद्वादशहस्तोधममंडपः द्वादशहस्तोचतुर्दशहस्तोमध्यः षोडशाष्टाद

उच्चांभूमिंमंडपस्यप्रकुर्याद्धस्तोन्मानामर्द्धहस्तोन्मितांवामध्येभूमिंमंडपेनोन्मितांचत्यक्त्वाकुर्यान्मंड
पंचेद्द्वितीयः १४ दशसूर्यकरोन्मितोऽधमः स्याद्दिनशक्रप्रमितैःकरैस्तुमध्यः धृतिभूपकरोन्मितोव
॥ रीयाननखहस्तोऽप्यथमंडपस्तुलायां ॥ १५ ॥

शकरोत्तमः तुलापुरुषदानेविंशतिहस्तोप्युत्तमः मंडपेआ
यामविस्तारौतुल्यावेवेतिव्याख्याअत्रविस्तारायामयोरंगुलादिकंक्षिप्त्वात्यक्त्वावाहषायस्तिध्यर्थेपतितव्यंउक्तंविश्वकर्मणाचशाक्
धर्मेषुवैश्येषुमंडपेभ्योज्यवेश्मसुहृषातुरंगशालायांगोशालागोकुलेषुचेतिपंचरात्रेकनीयान्दशहस्तःस्यान्मध्यमोद्वादशोन्मितः
तथाषोडशभिर्हस्तैर्मंडपःस्याद्विहोत्तमः तथादशद्वादशहस्तोचद्विद्विद्व ॥ ॥ ॥ ॥ ॥ ॥ :

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

८ ध्याततः क्रमात् लिंगपुराणे त्रिंशद्धस्तप्रमाणेन मंडपं कूटमेववा तथा दशद्वादशहस्तो च द्विद्विवृध्या ततः क्रमात् लिंगपुराणे त्रिंश
द्धस्तः प्रमाणेन मंडपं कूटमेववा तथाष्टादशहस्तेन कलाहस्तेन वा पुनरिति ननु द्वादशहस्तमंडपस्य कथमधमत्वं चेति उच्यते दशह
स्तापेक्षया मध्यमत्वं चतुर्दशहस्तापेक्षया कनिष्ठत्वं यथैकस्यैव यजमानस्य कुत्रचित् गौणत्वं कुत्रचिन्मुख्यत्वं तद्वद् दशहस्त मं
डपं नवकुंडीपक्षे पंचमेखलापक्षे च आचार्याद्युपवेशनं न संभवतीति अत्र रत्न्यरत्नैकहस्तपरिमितैः कुंडैकमेखलापक्षएव
वादरणीयः औचित्याद् र्थात्परिमाणमिति कात्यायनोक्तेश्च उत्तमेपि मंडपे दशहस्तकुंडनवक पंचमेखलादिपक्षस्यसमावेशो

दिगंतराले द्विकरं भवेद्वा चतुष्टयं वेदगजांगुलैस्तत् विवर्द्धितं मध्यवरिष्टयोः स्याद्वेदी त्रिभागेन समा
॥ करोच्च १६
नस्यादिति मंडपवृद्धिकार्या यतो मंत्रमुक्तावल्यां चतुर्विंशहस्तपर्यंतं मंडपवृद्धिः वास्तुशास्त्रे तु पंच
हस्तमारभ्य द्वात्रिंशद्धस्तपर्यंतं वृद्धिः कर्मविशेषे उक्ता सा चात्र विस्तरभयान्न लिख्यत इति १५ अथ द्वारमानं वेदीमानं चाख्या
नकाह दिङ्मध्ये द्वारचतुष्टयं द्विहस्तं भवति तत् द्वारं मध्यमोत्तमयोर्मंडपयोः चतुरष्टांगुलवृद्धिमत् मध्यमंडपे चतुरंगुलावृ
द्धिः उत्तमे चाष्टांगुलवृद्धिः कार्या वेदीमं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



डपस्तत्तृतीयांशेनमध्येकार्यामंडपेनवकोष्टकेकृतेसतिमध्यकोष्टेकार्यासमाहस्तमात्रमुच्चार्या अन्यत्रइष्टिकाभिः कार्येत्येतत्केवलंसमत्व
साधनायेतिव्याख्यापंचरात्रेकनिष्टेद्विकरंद्वारंचतुरंगुलवृद्धितःमध्यमोत्तमयोरितिक्रियासारेत्रिभागंमंडपंकृत्वामध्यभागस्तुवेदिकाहस्त
मात्रंतदुत्सेधंचतुरस्रंसमंततः वसिष्टोपिहस्तोन्नतांचविस्तीर्णामितिमत्स्यपुराणादिषुयद्देदिमानमन्ययोक्तंतत्कर्मविशेषेज्ञेयंसिद्धांतशे
खरेतुविशेषः वेदीचतुर्विधाप्रोक्ताचतुरस्राचपद्मिनी श्रीधरीसर्वतोभद्रादीक्षासुस्थापनादिषुचतुरस्राचतुः कोणावेदीसर्वफलप्रदातद्वा।

तुलाप्रदानेऽधममध्ययोसास्यात्पंचहस्तोत्तमकेद्विहस्ताईशानभा
गेग्रहवेदिकातुहस्तोन्मितोच्छ्रायवतीत्रिवप्रा ॥ १७ ॥ ❋ ॥

गादिप्रतिष्टायांपद्मिनीपद्मसंनिभा राज्ञोस्यात्सर्वतोभद्राचतुर्भद्राभिषेचनेविवाहेश्रीधरीवेदीविंशत्यस्रसमन्वितादर्पणोदरसंका
शानिम्नोन्नतविवर्ज्जितेति १६ अथतुलापुरुषदानेविशेषंविपरीताख्यानकाहतुलापुरुषदानेधममध्यममंडपयोः पंचहस्ताउत्तम
मंडपेसप्तहस्ताभवतिमंडपस्येशानभागेग्रहवेदिकाहस्तायामदैर्घ्योच्छ्राया त्रिवप्राभवतीतिव्याख्यामात्स्येपंचहस्ताभवेद्वेदीसप्तह राम
स्ताथवाभवेत्अत्रमध्यमाधमयोः पंचहस्तानमेसप्तहस्तेतिनिबंधकर्तृभिर्व्यवस्थापितंमंडपस्येशानभागेग्रहवेदिःकरोन्मितेति १७ ८

For Private and Personal Use Only

अथस्तंभनिवेशनंभुजंगप्रयात शालिनीभ्यामाह समेतत्तीर्येशे पूर्वापरं दक्षिणोत्तरंचापिसूत्रं दद्यात् एवंनवकोष्ठात्मकोमंडपोभ
वतितत: तृतीयांशांतेष्वष्टसुचतर्षुवहि: कोणेषुचसमानशुभान्दृढान्यज्ञीयवृक्षोद्भवान् पंचहस्तप्रमाणात् द्वादशस्तंभान्दध्यान्
दध्याद्धारयेतस्तंभवेद्या: कोणषुअष्टहस्तप्रमाणात् चतुर:स्तंभान्सचूडान्तादृशानेवाग्नेयीदिग्त:प्रादक्षिण्याद्दध्याद्रोपयेत्स्तंभपंच
मांशंभूमौनिखनेदेवंकृतेषोडशस्तंभस्थापनंस्यादितिव्याख्यापंचरात्रेमंडपाद्धोच्छ्रितान्विदसंख्याश्चूडासमन्वितान्स्तंभातसमंचसंस्था
समत्रित्रिभागेचसूत्रंप्रदद्यादुदग्दक्षिणंचापिपूर्वापरंचततस्त्र्यंशपूर्तौचकोणेषुदध्यात्समस्तंभकान्द्वादशैवे
षुहस्तान् १८ वेद्या:कोणेहस्तिहस्तोच्चवेदस्तंभान्दद्याद्वन्हिदिग्त:सचूडान्प्रादक्षिण्यात्पंचमांशंतुभूमौदध्या
पस्तंभद्वादशकंपुन: वाह्येप्युक्तप्रकारेणतत्रतत्रविभागत: अत्रयद्यपिसाधारणेयनमंडपो११ देवंषोडशस्तंभसंस्था ॥ १६॥
च्छ्रितानित्युक्तंतथापिषोडशहस्तमंडपार्द्धेनैवेतिज्ञेयंसर्वमुख्यस्यषोडशहस्तस्यैवसर्वत्रोहत्वात्यच्छारदातिलकेषोडशस्तंभसंयुक्तंच।
स्तास्तेषुमध्यमा: अष्टहस्तसमुच्छ्राया इतिवेदसंख्याश्चूडसमन्वितास्तथेतिवाक्यात् चतुर्षुवेदिकोणगेषुस्तंभेषुचूडानियम: अन्येषुद्वादशसुक
र्णाश्चूडावाकार्या: अन्यच्चस्तंभोच्छ्रायेशिलान्यासेसूत्रयोजनकीलकेखननावटसंस्कारेप्रारंभोवह्निगोचरेइतिवास्तुशास्त्रेपंचमांशंखनेद्भूमौसर्वेषां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतस्तंभोपरिकाष्ठनिवेशनंइंद्रवज्रयाह प्रथमंचतुर्षुस्तंभेषुवेदिकोणगेषुवलिकाख्यंकाष्टचतुष्टयंप्रांतेछिद्रवन्निधेयं तत्रपूर्वापरं
द्वयंदक्षिणोत्तरंद्वयंचचूडासुनिदध्यात् तिर्यङ्निहितस्यकाष्ठस्यवलिकेतिसंज्ञा एवंद्वादशस्वपिवाह्येषुस्तंभेषुकर्णेषुचूडासुवा
वलिकाः काष्टानिनिधेयानिततोमध्यस्तंभचूडातः पूर्वापरमेकंदक्षिणोत्तरमेकंकोणेचैकंकाष्टंसमतयास्थापयेदिति एवंचतुर्ष्व
पिस्तंभेषुद्वादशकाष्ठानिभवंति ततोमध्येमध्येचकाष्ठानिसकर्णकानिदेयानीतिव्याख्या २० अथमंडपाच्छादनेरथोद्धतयाह वेदि

स्तंभेषुतिर्यग्वलिकानिधेयाश्चूडासुकर्णेष्वथवावहिः स्थे पूर्वापरंदक्षिणसौम्यदिक्स्थंकोणांतराकाष्ठचयं
निदध्यात् २० मध्यभागशिखरैरचयित्वाछादयेदपिकटैर्ऋजुवंशैः द्वारवर्ज्जमिहमंडपमेनंस्तंभकानपि
(( सवस्त्रसमूहैः ॥२१॥

स्तंभोपरिशिखराकारांरचनांकल्पयनंमंडपंद्वारवर्जितं ऋजुवंशैः कटैः छादयेत् षोडशा
नपिस्तंभान्सवस्त्रसमूहैर्दुकूलादिभिश्छादयेदितिव्याख्याक्रियासारेनारिकेलिदलैर्वापिपल्लवैर्वायवेणुभिः आछाद्यामंडपाः स
र्वेद्वारवर्जंतुसर्वतः वास्तुशास्त्रैःकटैः सद्भिस्तुसंछाद्याविजयाद्यास्तुमंडपाइति हयग्रीवपंचरात्रेदर्पणेश्चामरैर्घंटैः स्तंभान्वस्त्रैर्वि
भूषयेदिति ॥ २१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१० अथतोरणान्याह वसंततिलकया पूर्वादिदिक्षुवटोदुंवराश्वत्थप्लक्षैस्तोरणानिरचयेत् अथवाश्वत्थोदुंवरप्लक्षवटैररचयेत्तेषामभावेइमानि
तोरणानिएकेनैववृक्षेणयथोपपन्नेनरचयेदितिव्याख्यामहाकपिलपंचरात्रे देवास्तोरणरूपेणसंस्थितायत्रमंडपे विघ्नविध्वंसना
र्थायरक्षार्थमध्वरस्यचन्यसेन्न्यग्रोधमैंद्र्यांतुयाम्यांचौदुंवरंतथो वारुण्यांपिप्पलंचैवकौवेर्यांप्लक्षजंन्यसेत् अश्वत्थोदुंवरप्लक्षवटशा
खाकृतानिचमंडपस्यप्रतिदिशंद्वाराण्येतानिकारयेत् द्वारकारत्वात्द्वारशव्दप्रयोगः पंचरात्रे अलाभेष्वेकमेवैषांसर्वाशासुनिवेश

पूर्वादिदिक्षुरचयेदपितोरणानिन्यग्रोधजंतुफलपिप्पलवृक्षराजैः अश्वत्थजंतुफलपर्कटिभूरिपर्ङ्विवैषा
मभावतइमान्यथवैककेन २२ हस्तावहिर्मंडपतः शरांगसप्तैः करैस्तान्यधमादिकेषुदीर्घाणिचप्राहुरथा
यतिःस्यात्तेषांद्विहस्ताच्चरणप्रवृद्धा २३

येदितिसर्वाभावेशमीजंवूखदिराणामन्यतमेनवाकार्याणि २२ अथतोरण
मानंनिवेशनंचविपरीताख्यानक्याह मंडपान्मंडपद्वाराद्वहिर्हस्तमात्रेतानितोरणानि पंचषट्सप्तहस्तैर्दीर्घाणिअधमादिकेषुत्र
धममध्यमोत्तमेषुमंडपेषुप्राहुः अथतेषांतोरणानांआयतिरायामो द्विहस्तः चरणवृध्यासहस्यात् अधमेमंडपेद्विहस्ताआयातिःस्या
त्मध्येषडंगुलानिद्वौहस्तौउत्तमेसार्द्धहस्तद्वयं इतिव्याख्याआग्नेये पंचषट्सप्तहस्तानिहस्तखातेस्थितानिचवास्तुशास्त्रे पंचहस्तप्र ॥

माणास्ते विस्तारेणद्विहस्ताकाः षडंगुलाभिस्तद्वाश्च सप्तहस्तास्तथोत्तमे अर्थान्मध्यमे मंडपे षट्हस्तास्तेनोरणा इति ॥२३॥ अथफलका
द्विनिवेशनमुपजातीद्वयेनाह स्तंभानांतोरणस्तंभानां दशांगुलपरिणाहानां मध्ये न तिर्यक् फलकं उपांतयोः सच्छिद्रं स्यात् फल
कं नाम तोरणस्तंभोपरितिर्यग्दीयमानं काष्ठं यदिके स्वभिधीयते अल्पमंडपातोरणे सार्द्धहस्तद्वयमितं मध्ये हस्तत्रयपरिमिते उत्तमे च सा

स्तंभार्द्धमानं फलकं तु तिर्यक् नवेशविश्वप्रमितांगुलाश्च तन्मूर्द्धि कीलाः
स्वतुरीयभागततस्तु शूलाकृतयश्च तेस्युः ॥ २४ ॥ ❋ ॥ ❋ ॥

र्द्धहस्तत्रयमितां शेवे यागे चतुः फलकमस्तके शूलाकृतयः नवैकादशत्रयोदशांगुलदीर्घाः स्वचतुर्थांशेन विस्तृताः तेन सपादद्वयपा
दोनत्रयसपादत्रयांगुलविस्तृताः स्वतोरणकाष्ठजाः कीलाश्चत्वारो भवंति तेषां कीलानां फलकस्य मध्यभागे वेशनं द्वित्रिचतुरंगुल
मिति अल्पमध्यमोत्तमेषु स्यान्मंडपेषु ॥ २४ ॥ ❋ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथविष्णुयोगपुनः अंगुलद्विरिति अधमादिषुमंडपेषुदशांगुलचतुर्दशांगुलदीर्घाः स्वचतुर्थांसेनविस्तृताः तेनसार्द्धद्वयत्रिसार्द्धत्रयांगु
लायामाः वेशनार्थमधोलघुकीलेनसहिताः प्रागादिक्रमेण शंखचक्रगदापद्मचिन्हिताः कीलाः स्वतोरणकाष्ठभवाः फलकमध्येनिधे
याः तोरणस्तंभेष्वपिपंचमांशेननिखननमिति व्याख्याशारदातिलके तिर्यक्फलकमानंस्यात्स्तंभनामर्द्धमानत इतिमंत्रमुक्तावल्यां अ
ग्रयोमध्यभागेचयदिकायां त्रिशूलकमिति पिंगलमते शूलेनचिन्हिताः कार्याद्वारशाखसुमस्तके शूलेनवांगुलैर्दैर्घ्यंतुरीयांशेनवि
स्तृतिः ऋजुवैमध्यशृंगंस्यात्किंचिद्वक्रंतुपक्षयोः प्रथमंतत्समाख्यातंद्व्यंगुलंरोपयेत्ततः थाशेषाणांद्व्यंगुलावृद्धिर्वेशाद्ध्यंगुलवृद्धितः।

तद्देशनं द्वित्रियुगांगुलानि शैवे तु विष्णोर्यजमेंगुलर्द्धैः कीलेषु शंखारिगदांबुजांकेष्विष्वंशरोयः किलतो

इतिवास्तुशास्त्रेमस्तके द्वादशांशेन शंखंचक्रंगदांबुजंप्रागादिक्रमयोगेनन्यसेत्तेषांस्वदारुजमितिअत्र ॥ रणेषु ॥२५॥
द्वादशांशः शाखानामेवेति केश्चित्फलकद्वादशांसेनेत्युक्तं तदसत् शाखाः प्रकृत्यैवफलकादीनांमानोक्तेः शूलान्यपिस्वदारुद्भ
वानीतिन्यायाच्छाखादिस्थानीयत्वात् पंचमांशेन्यसेद्भूमौ सर्वसाधारणोविधिरिति २५ २५ ॥ अथमंडपवर्णनव्याजेन
मंडपालंकरणानिवदन्मंडपकर्तृभ्यआशिषंशार्दूलविक्रीडितेनप्रयच्छति ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्यंतिऊर्ध्वोनिभवंतिपत्राणियासांताः तथाभवंतिफलैरतिनम्राः विलसंत्यः कोमलाः एतादृश्योयारंभाः कदल्यस्ताभिरालिंगिताःस्तंभाः
यस्यसस्तंभमूलेधृततादृशकदल्यः बहुपत्रैराम्रापल्लवैः सर्वत्रकृतवेष्टितः राजंतिचामराणियस्मिन्तादृशः सन्संप्रबद्धाः मुकुराः आद
र्शाः यस्मिन्तादृशः सन्उदंचतिउपरिविलसंतिएतादृशानिवितानानितैरंचितोन्वितः पुष्पाणिपद्मचंपकजातीमालतीमल्लिकाकुसु
दादीनिफलानिजंबीरदाडिमकदलीआम्रनारिकेलपूगीफलादीनितैरन्वितः एतादृशोयंमहामंडपः भवतांफलायउत्तमफलप्राप्तयेभू

उद्यत्पत्रफलातिनम्रविलसद्रंभाभिरालिंगितस्तंभोनेकदलैरसालविटपैः सर्वत्रसंवेष्टितः॥ राजच्चाम
रसंप्रबद्धमुकुरोदंचद्वितानान्वितोयुक्ताः पुष्पफलैः फलायभवतांभूयान्महामंडपः ॥ २६ ॥ ॥ ॥

यादितिव्याख्या सिद्धांतशेखरे चूतपल्लवमालाद्यवितानैरुपशोभितं विचित्रवस्त्रसंछन्नंपट्टकूलविभूषितं सफलैः कदलीस्तं
भैः क्रमुकैर्नारिकेलजैः फलैर्नानाविधैर्भोज्यैर्दर्पणैश्चामरैरपिभूषितंमंडपंकुर्यात्तिलपुष्पसमुज्वलमितिअन्यथाभावेदोषउक्तःपं
चरात्रेअनुक्तसाधनैः क्लृप्तोयदिवा कुटिलाकृतिः मानाधिकोथवान्यूनोमंडपः कर्तृनाशनः यथोक्तकृतमंडपंफलाधिकंतत्रैव अ
ख्यातसाधनैः क्लृप्तः सरत्नः सममानकः मनोज्ञोमंडपोयोसौकर्मकर्तुः सुखावहइति॥ २६ ॥ ॥ ॥ ॥ ॥

For Private and Personal Use Only

अथध्वजनिवेशनंविपरीताख्यानक्याहध्वजान्द्विहस्तायतायामान्पंचहस्तदीर्घान्सुपीतारुणकृष्णनीलश्वेतानगैरिकादिलिखितदि।
क्पालवाहान् दशहस्तवंशमस्तकेयोजितान्हस्तद्वयंनिखातान्ध्वजांस्तानपिपूर्ववतइतिवक्ष्यमाणत्वात्प्राच्यादिआवहेद्वारयेदिति।
व्याख्याप्रतिष्ठासारसंग्रहे पीतरक्तादिवर्णाश्च पंचहस्ताध्वजास्मृताः द्विपंचहस्तैर्दंडैस्तैर्वंशजैः संयुतामताइति क्रियासारे मातंगवल्लभ
हिपसिंहमत्स्येणवाजिनः वृषभंचयथान्यायंध्वजमध्येक्रमाल्लिखेत् पंचांशंनिखनेदिति अकरणेदोषः पंचरात्रे चिंतयंत्यसुरश्रेष्ठाध्व

ध्वजान्द्विहस्तायतिकांश्च पंचहस्तान्सुपीतारुणकृष्णनीलान् श्वेतासितश्वेतसितान्दिगीशवाहान्वहे
द्विकरवंशशीर्षे २७ लोकेशवर्णैश्चयुताः पताकाः शैलेंदुदैर्घ्यायतिकाश्चमध्ये चित्रध्वजंद्विकरदैर्घ्यं।
८वंशत्रिदोस्ततंप्रांतगकिंकिणीकं ॥२८॥

जहीनसुरालयं ध्वजेनरहितेब्रह्मन्मंडपेतुवृथाभवेत् पूजाहोमादिकं
सर्वंजपाद्यंयत्कृतंबुधैरितिध्वजारोपणफलंतत्रैवयत्कृत्वापुरुषः सम्यक्समस्तफलमाप्नुयादिति २७ अथपताकानिवेशनमा
हध्वजनिवेशनंनवमंकुंडपताकानिवेशनंचेंद्रवज्रानुष्टुब्भ्यामाह लोकेशानांलोकपालानांयेवर्णाः पीतादयः पूर्वश्लोकोक्ताःगै
रिकादिलिखितवज्रशक्तिदंडखड्गपाशांकुशगदात्रिशूलानितैर्युताः सप्तहस्तदीर्घाः एकहस्तविस्तृताः पताकाः दशहस्तवंशशीर्षगाः चित्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुं॰सि॰ ध्वजंत्रिहस्तविस्तृतंप्रांतेवर्तमानकिंकिणीकंशीर्षेसचामरंदशहस्तदैर्घ्यंवंशेचताहशंतंमध्येविन्यसेत् २८ पूर्वादितःपताकाश्चविन्यसे।
१२ दितुत्तरश्लोकेनान्वयः नवमीपताकांपूर्वेशानयोर्मध्येश्वेताताहशीमेवाचार्यकुंडेविन्यसेत्ध्वजानन्ताअपिपताकापूर्वादिक्रमेणभूमौपं
चाशरोपयोनविन्यसेदितिव्याख्यातदुक्तंमारसंग्रहेप्रतिकुंडंपताकास्तुप्रोक्तासुःशास्त्रकोविदैः सप्तहस्ताःपताकास्युःसप्तमेनचविस्तृता॥
लोकपालानुवर्णेननवमीतुहिनप्रभांपताकाश्चध्वजाश्चापिगंधपुष्पसमन्विताःइतिपरशुरामःत्रिहस्तवितनोदीर्घोदशहस्तोविचित्रितःचाम

श्वेतांचनवमींपूर्वेशानयोर्मध्यतोवुधः विन्यसेत्तुपताकाश्चध्वजांस्तानपिपूर्वशः २९ प्राच्याश्चतुष्कोणमभ
गेंदुखंडत्रिकोणवृत्तांगभुजांवुजानि अष्टास्त्रिशक्रेश्वरयोस्तुमध्येवेदास्त्रिवावृत्तमुशंतिकुंडं ॥ ३०॥ ॥

रेणान्वितःशीर्षेप्रांतेशक्षुद्रघंटिकःदशहस्तोहृतोदंडेपुष्पगंधैःसमन्वितइति २९ अथनवकुंडनिवेशनंविपरीताख्यानक्याहप्राचीत
आरभ्यचतुरस्त्रयोनिवृत्तार्द्धत्रिकोणवृत्तषडस्त्रपद्माष्टास्त्रिकुंडानिभवंतिप्राचीशान्योर्मध्येनवममाचार्यकुंडंस्यात्तच्चतुरस्त्रंवृत्तंवेतिव्या।
ख्याशारदातिलके अष्टाश्वासासुरम्याणिकुंडान्येतान्यनुक्रमात् चतुरस्त्रंयोनिरर्द्धचंद्रंत्र्यस्त्रंचवर्तुलंषडस्त्रंपंकजाकारंअष्टास्त्रंतानिनाम रम्भः
तःआचार्यकुंडंमध्येस्यात्गौरीपतिमहेंद्रयोरितिसिद्धांतशेखरेपुरंदरेशयोर्मध्येवृत्तंवाचतुरस्त्रकंतदाचार्यविनिर्दिष्टमितिअयमुत्तमःपक्षः३० १२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथपंचकुंडैयेककुंडनिवेशनमिंद्रवज्रयाह आशादिकृतत्रकुंडानिचतुरस्रवृत्तार्द्धवृत्तपद्मानिईशदिशिकुंडंचतुरस्रंवृत्तंवातैः पंचकुंडी
निवेशनंस्यात् यदाचैकमेवकुंडंतदापश्चिमेउत्तरेवाईशान्यांवास्यात् परंतुचतुरस्रंवेद्याः सकाशात्तानिसर्वाणिकुंडानिसपादेनकरेणत्रिं
शदंगुलांतरेणवावेदीपादांतरेणवेद्याश्चतुर्थांशेनमंडपेनवकोष्टकृते अष्टसुभागेषुमध्येवाभवतीतिव्याख्यानारदीये यत्रोपदिश्यतेकुं
डंचतुष्कंतत्रकर्मणिवेदास्रमर्धचंद्रंचवृत्तंपद्मनिभंतथा कुर्यात्कुंडानिचत्वारिप्राच्यादिषुविचक्षणः॥ पंचमंकारयेत्कुंडंईशदिग्गोचर

आशेशकुंडैरिहपंचकुंडीचैकंयदापश्चिमसोमशैवेवेद्याः स
पादेनकरेणयद्वापदांतरेणखिल्लकुंडसंख्या ॥ ३१ ॥ ६ ॥

द्विजेइति अयंमध्यमः पक्षः केश्चित् पूर्वेशयोरितिलिखितंतदसत् सोमशंभौ एकंवाशिवाकायांप्रतीच्यांकारयेद्बुधः आचार्या
अपिअथवादिशिकुंडमुत्तरस्यांप्रविदध्याच्चतुरस्रमेकमेवेत्ययंकनिष्टः पक्षःनवग्रहाधिकारेवशिष्टसंहितायांकुंडतन्मध्यभागेतु
कारयेच्चतुरस्रकंवितस्तिद्वयमाख्यातंतत्कुंडंसचतुरंगुलमिति वेदीपादांतरंत्यक्त्वानवकुंडानिपंचचेति नारदीये कुंडवेद्यंतरंचैवस
पादकरसंमितमितिकैश्चित्त्रयोदशांगुलमप्यंतरमुक्तंतत्रमंडपानुसारेणव्यवस्थेति ॥ ३१ ॥ ❋ ॥ ७ ॥ ६ ॥ ❋ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथवर्णविशेषेस्त्रीणांचकुंडविशेषंशालिन्याहविप्रादारभ्यविप्रक्षत्रियविट्शूद्राणांचतुःकोणवृत्तवृत्तार्धत्रिकोणानिभवंतिअथवावि
प्रादिवर्णेषुचतुःकोणानिवर्तुलानिसर्वाणिकुंडानिभवंति यदास्त्रीयजमानाभवतितदायोन्याकाराण्येवकुंडानिभवंतीतिव्याख्याशा
रदायांविप्राणांचतुरस्रंस्याद्राज्ञांवर्तुलमिष्यते वैश्यानामर्द्धचंद्राभंशूद्राणांत्र्यस्रमीरितंचतुरस्रंतुसर्वेषांकेचिदिच्छंतितांत्रिकः पंच
रात्रेसर्वाणितानिवृत्तानिचतुरस्राणिवासदासनत्कुमारःस्त्रीणांकुंडानिविप्रेंद्रयोन्याकाराणिकारयेदिति ३२ अथप्राच्यादिकुंडे
विप्रात्शुत्यस्रंचवृत्तंचवृत्तार्द्धत्र्यस्रिस्याद्वेदकोणानिवापिसर्वाण्याहुर्वृत्तरूपाणिचान्येयोन्याकाराण्यं
गनानांतुतानि ३२ सिद्धिःपुत्राः शुभंशत्रुनाशः शांतिर्मृतिछिद्वृष्टिरारोग्यमुक्तंहिफलंप्राच्यादिकुंडके ३३
षुफलविशेषमाह प्राच्यादिकुंडेष्वष्टस्वष्टौफलानिस्युःशारदायांसर्वसिद्धिकरंकुंडंचतुरस्रमुदाहृतं पुत्रप्रदंयोनिकुंडमर्धेद्राभं
शुभप्रदं शत्रुक्षयकरंत्र्यस्रंवर्तुलंशांतिकर्मणि छेदमारणयोःषष्ठंषडस्रंपद्मसंनिभं वृष्टिदंरोगशमनंकुंडमष्टास्रमीरितं का
मिकेतुफलांतरंऐंद्र्यांस्तंभेचतुष्कोणंअग्निभागेभगाकृति चंद्रार्धंमारणेयाम्येद्वेषेत्र्यस्रंतुनैरृतेवारुण्यांशांतिकेवृत्तंषडस्रमु राम:
च्चाटनेनिलेउदीच्यांपौष्टिकेपद्मरौद्र्यामष्टास्त्रिभुक्तिरमितिि ॥३३॥ १३

For Private and Personal Use Only

अथ शताधिकं होमे कियती वृद्धिस्तत्राह ॥ वृद्ध्यानयने सूत्रं। अंतरं नवभिर्भक्तं यत्पूर्वापरकुंडयोः। अंगुलानियदाप्तं तु सा वृद्धिरिष्टहोमके १
अथ होमसंख्यया कुंडमानं शिखरिण्याह शतार्धमिते पंचाशन्मिते होमे रत्निमितं कुंडं शतमिते होमे रत्निमितं सहस्रमिते होमे हस्तमितं दशसह
स्रमिते द्विहस्तं लक्षहोमे चतुर्हस्तमितं दशलक्षहोमे षडस्रं कोटिहोमे ऽष्टहस्तमितं दशहस्तमितं वा केचित् षोडशकरमपि प्राहुरिति व्याख्याभ।
विष्णुपुराणे मुष्टिमानं शतार्धे तु शते चारत्निमात्रकं सहस्रे त्वथ होतव्ये कुंडं कुर्यात्करात्मकं द्विहस्तमयुते तच्च लक्षहोमे चतुः करं दशलक्षमिते हो।

शतार्धे रत्निस्याच्छतपरिमितेरत्निविततं सहस्रहस्तं स्यादयुतहवने हस्तयुगलं चतुर्हस्तं लक्षे प्रयुतहवने षट्
करमितैः ककुब्भिर्वा कोटौ नृपकरमपि प्राहुरपरे ३४ लक्षैकवृध्या दशलक्षकांतं करैकवृध्या दशहस्तकं च॥

मे षट्करं संप्रचक्षते अष्टहस्तात्मकं कुंडं कोटिहोमेषु नाधिकं शारदायां दशहस्तमितं कुंडं कोटिहोमेपि शस्यते स्कांदे कोटिहोमे चतु
र्हस्तं चतुरस्रं समंततः योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलमिति ३४ इदं प्रायः स्थूलद्रव्यविषयात्तथा केषांचिन्मतेन कुंडमानमुपजाति
कयाह लक्षैकवृध्या दशलक्षकाणां अंतं समाश्रिमर्यादीकृत्य स्याद्दशलक्षकांतं एकलक्षमारभ्य लक्षवृध्या दशलक्षपर्यंतं इत्यर्थः करस्य.
एकवृध्या दशहस्तकं एककरमारभ्यैककरवृध्या दशहस्तं यावत्कुंडं प्राहुरिति पूर्वेणान्वयः कोटेरर्धे पंचाशल्लक्षे दशलक्षे विंशतिलक्षे लक्षद

[illegible]

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सप्तपंचषट्त्रिकरंकुंडमितिव्याख्या शारदायामेकहस्तमितंकुंडंलक्षहोमेविधीयतेलक्षाणांदशकंयावत्तावद्धस्तेनवर्द्धयेत् सिद्धांतशेख
रेलक्षार्द्धेत्रिकरंकुंडंलक्षहोमेचतुष्करं कुंडंपंचकरंप्रोक्तंदशलक्षाहुतौक्रमात् षड्ढस्तंलक्षविंशत्यांकोट्यर्द्धेहस्तसप्तकमिति इदमेवकुंड
मानंकामिकादिमतसिद्धांतशेखरेशारदाहेमाद्रिप्रमुखैः प्राचीनैः रामवाजपेयिराघवभट्टकुंडरत्नाकरकौमुदीकारादिभिर्नवीनैश्चलिखि।
तंकैश्चिदन्ययापिकुंडमानान्युक्तानितानितत्रप्रकरणेवशात्तत्कर्मविशेषेद्रष्टव्यानि ३५ अथैकहस्तादशहस्तांतंयावत्कुंडेषुभुजमानं।

कोट्यर्धेदिग्विंशतिलक्षलक्षदलेमुनीष्वर्तुक्रशानुहस्तम् ३५ वेदाक्षीणियुगाग्नयः शशियुगान्यष्टाब्धयस्त्री
षवोष्टाक्षावन्हिरसारसांगकमितानेत्रर्षयोक्षस्वराः अंगुल्योथयवाः खमभ्रस्त्रिषवः खंपंचषट्सागराः स।
प्ताभ्रंमुनयस्त्वमीनिगदितावेदास्तकेवाहवः॥ ३६॥ ॥ शार्द्दूलविक्रीडितेनाह एकहस्तेकुंडेचतुर्विंशत्यंगुलानिआ।
यामविस्तारौ २४ द्विहस्तेचतुस्त्रिंशत् ३४ इमानिपादोनयूकाचतुष्टयन्यूनानिअल्पांतरत्वात्पूर्णान्येवधृतानित्रिहस्तेपंचयवाधिकेकच॥
त्वारिंशेदंगुलानि ४१५ चतुर्हस्तेऽष्टचत्वारिंशत् ४८।०। पंचहस्तेपंचयवाधिकानित्रिपंचाशदंगुलानि ५३।५ षड्ढस्तेपादोनैकोनष। रामः
ष्टिः ५९।६ सप्तहस्तेसार्द्धत्रिषष्टिः ६३।४ अष्टहस्तेयवानांसप्तषष्टिः ६६।७ नवहस्तेद्वासप्ततिः ७२ ॥ ० ॥ ॥ ० ॥ ॥ १४

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशहस्तेयवोनाषट्सप्ततिरिति ७५।७ चतुर्भुजेकुंडेषुयाउक्ताइतिव्याख्या अत्रोपपत्तिः एकहस्तक्षेत्रस्यचतुर्विंशत्यंगुलात्मकस्यभु
जाकोटिघातःक्षेत्रफलंतच्चषट्सप्तत्यधिकपंचशती ५७६ एतत्पदमेकहस्तस्यक्षेत्रांगुलानिचतुर्विंशति २४ एवंक्षेत्रफलस्यघातादि
गुणितस्यमूलस्त्रिंशदाद्यंगुलानिभवंति ३६ अथयोनिनिवेशनमिंद्रवज्रयाहऐंद्र्याःप्राच्याआरभ्यकुंडत्रयीचतुरस्रयोनिवृत्तार्धरूपाद।
क्षिणयोनिःस्यात उतराग्राअर्थाद्धोताउदङ्मुखः इतराणिपंचकुंडानित्र्यस्त्रिवृत्तषडस्रिपद्माष्टकोणानिप्रत्यग्योनानिप्रागग्राणिअर्था

कुंडत्रयीदक्षिणयोनिरैंद्र्याः सौम्याग्रकाश्यादितराणिपंच पश्चाद्गगा
नींद्रदिगग्रकाणियोनिर्नकोणेनचयोनिकुंडे ॥ ३७ ॥ ❋ ॥

द्धोताप्राङ्मुखनवममपिकुंडंदक्षिणयोनिउदगग्रग्रायोनिः कोणेयोनिकुंडेचनास्तीतिव्याख्यास्वायंभुवेप्रागग्रियाम्यकुंडानांप्रो
क्तायेःनिरुदङ्मुखीपूर्वामुखाःस्थिताःशेषाययाशोभंव्यवस्थिताइतित्रैलोक्यसारेनवमस्यापिकुंडस्ययोनिर्दक्षदलेस्थितेतिअन्यत्रा
नार्पयेत्कुंडकोणेषुयोनिंतांतत्रविघ्नमइतियोनिकुंडेतथायोनिंपद्मनाभिंविवर्जयेदिति ॥ ३७ ॥ ❋ ॥ ✱ ॥ २॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथसर्वेषांकुंडानांप्रकृतिभूतंचतुरस्रंतावच्छालिन्याहइष्टव्यासाद्विगुणितव्यासंचतुर्थांशाकृतचिन्हंसपाशंसूत्रंपूर्वपश्चिमस्थयोः
शंकोर्दत्वादक्षिणोत्तरसूत्रमध्येयथामध्यचिन्हंभवतितथाकोणयोःपाशाच्चतुर्थांशंकर्षेत् एवमन्यतोपिएवंकृतेसमचतुरस्रंस्या
त्इदमेवसर्वेषांकुंडानांमूलमितिव्याख्याउक्तंच चतुरस्रमिदंप्रोक्तंसर्वकुंडेषुकारणमिति अत्रसमश्रुतौतुल्यचतुर्भुजेतथायतेतद्भु
जकोटिघातःक्षेत्रफलंषट्सप्तत्यधिकपंचशती ५७६ एतावदेवयोन्यादिकुंडेषुएकहस्तेषुयथाक्षेत्रफलंसंपद्यतेतथायतितव्य

द्विघ्नव्यासंतुर्यचिन्हंसपाशंसूत्रंशंकौपश्चिमेपूर्वगेपि दत्वाकर्षेत्कोणयोःपाशतुर्ये
स्यादेवंवावेदकोणंसमानं ३८ क्षेत्रेजिनांशेपुरतःशरांशात्संवर्ध्यचस्वीयरदांशयु
क्तान्कर्णाघ्रिमानेनलिखेंदुखंडेप्रत्यक्पुरोंकाद्गुणभोभगाभं ॥ ३९ ॥ ❋ ॥

मिति ३८ अथायोनिकुंडमिंद्रवज्रयाह चतुरस्रेक्षेत्रेचतुर्विंशतिभागेकृतेसतिपंचाशान्स्वीयद्वात्रिंशदंशयुक्तानग्रेसंवर्ध्यततश्चतु
र्धाविभक्तंतस्यक्षेत्रस्यपश्चिमचतुरस्रद्वयमध्यांकात्कर्णसूत्रस्यचतुर्थांशेनप्रत्यक्पश्चिमभागेइंदुखंडेद्वताईदयेविद्वन्लिखततः एषः
पूर्वांकाद्दक्षिणोत्तरसूत्रसंलग्नवृत्तार्धंयावन्नीयमानगुणद्वयतोभगाकारंयोनिकुंडस्यादितिव्याख्याअथक्षेत्रफलानयनंअत्रक्षेत्रत्रयं॥ १५

For Private and Personal Use Only

पूर्वाकाद्दक्षिणोत्तरसूत्राग्रं यावन्नीयमानं सूत्रद्वयात्त्रिकोणमेकं तथा दक्षिणोत्तरसूत्राग्रात्पूर्वापरांतं यावन्नीयमानं सूत्रद्वयाद्प
रं त्रिकोणं ३ अथवृत्तार्द्धं मिलित्वा एकं वृत्तमिति वृतीयं क्षेत्रत्रयफलयोगे पूर्णफलं तत्र प्रथमस्य क्षेत्रफलं अत्र लंबांगुलानि १७।४
व १ भू २ भू २४ लंबेन निघ्नं कुमुखैक्यखंडमिति अत्र मुखाभावात् भूम्यर्धमेव लंबेन गुणितं सज्जातं प्रथम क्षेत्रफलांगुलानि २०५।७।०
अथापरस्य लंबः १२ भूः सेवा अत्रापि तथैव रीत्या क्षेत्रफलं १४४ अथ वृत्तार्द्धयोरेकं वृत्तं तत्फलं तत्र वृत्तव्यासः १६।७।६।१ व्यासस्य वर्गो भन
वाग्नि ३९।२७ निघ्ने सूक्ष्मफलं पंचसहस्रभक्ते रुद्राहते शक्रहृते यवास्यात्सूक्ष्मफलं संव्यवहारयोग्यमिति व्यासवर्गः २८८।०।०।२ अयं भन
वाग्नि ३९।२७ निघ्नः पंचसहस्रभक्तः जातं क्षेत्रफलं वृत्तस्य २२६।४।५ त्रयाणां योगे क्षेत्रफलं पूर्णं ५७६।०।४।५ अत्र लिक्षापंचकं यूकाचतुष्टयं
चाधिकं अल्पांतरत्वाद्दोषः ध्वजायसिद्धिश्च उक्तं च स्थापने सर्वकुंडानां ध्वजायः सर्वसिद्धिदः शतांशेवाधिकं हीनं ह्रासवृद्धी न दूषयेत् अयं
दोषविशुध्यर्थं क्रियते शास्त्रकोविदैरिति एतत्क्षेत्रस्योत्तराग्रत्वादुदीचीप्राचीवद्यवहर्तव्या एवमन्यकुंडयोरपि यत्पदार्था दर्शे चतुर्विंशति
धामध्यसूत्रे भक्त्वा पुरोन्यसेत् पंचांशान्वैककस्यत्रीन्विंशांशान्कोणपादतः वृतार्द्धे सोमध्यतिर्यक्सूत्रांतं च ततो पर्ययेत् पुरोवर्द्धितसूत्रां
तद्द्वसूत्रेस्याद्रगाकृतीति इमानि कुंडानि कादिमतादिग्रंथाविरुद्धानीति अनादरणीयानि नतान्यर्चनानि तदाकारत्वमात्रसंपादकानि न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षेत्रफलपूर्तिकराणितत्रशिष्यक्लेशोमाभूदितिस्थूलमार्गेणायोन्याकारमात्रंप्रतिपाद्यतेयोगंगणितानभिज्ञस्तेनचतुरस्रंकुंडंतंडुलादि।
नापूरयित्वातान्येवतंडुलान्योन्यादिकुंडेषुदत्वातत्पूर्तौतोष्टव्यमितिअत्रांगुलयवयूकालिक्षाः कृत्वागोमूत्रिकारीत्यागुणयित्वाऽष्टभि
र्भागेगृहीतेफलेउपर्युपरिचयोज्यमानेफलाद्युत्पद्यतेअंशसवर्णादिकुंडमात्रेणेतिज्ञेयं ३९वसंततमालिकयावृत्तार्धमाहस्वापशतांशेन।
युतोपइषुभागः पंचांशः अर्थात्क्षेत्रस्यैवतेनहीनावाप्तोरवभूमिः क्षेत्रंतन्मितेनकर्कटेनसूत्रेणावामध्यात्कृतंयद्वृत्तार्द्धंतस्मिन्नथ।

स्वशतांशयुतेषुभागहीनः स्वधरित्रीमितकर्कटेनमध्यात् कृतवृ
त्तदलेग्रतश्चजीवांविदधात्विंदुदलस्यसाधुसिद्धौ॥ ४० ॥०

तः पूर्वापरांरेखांजीवारूपांवृत्तार्द्धस्यसिध्येसाधुः स्याद्ययाकरोतुविद्वानितिव्याख्या।अत्रक्षेत्रफलं।अत्रक्षेत्रस्यपंचमांशोंगुलाद्यः ४।६।
३।११५ एतस्यशतांशोंगुलाद्यः।०।३।०।४अनेनान्वितः पंचमांशः ४।६।६।२।१अनेनोनाक्षेत्रभूः १९।१।१।५।७एतद्व्याससार्धद्विगुणोव्या
सः ३८।२।३।३।६ अत्रापिव्यासस्यवर्गइत्यादिरीत्याक्षेत्रफलं ११५।२।२।६।२।१ एतद्वृत्तफलं।अस्यार्द्धवृत्तार्द्धक्षेत्रफलं ॥५७।६।१।३।१ रामः
०।अथलिक्षैकंयूकात्रयंयवैकंचाधिकंअल्पांतरत्वान्नदोषः अत्रापिध्वजायएवेति ॥४०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १६

For Private and Personal Use Only

अथत्र्यस्त्रिकुंडंवर्तुलंचशार्दूलविक्रीडितेनाह अथपूर्वोद्दिष्टंकुंडंव्याख्यायतेक्षेत्रस्यतृतीयांशंपूर्वतोनिधायततउभयश्रोण्योश्चतुर्थां
शंनिधायदक्षिणउत्तरतश्चदत्वात्रिषुचिन्हेषुसूत्रदानात्कष्टरहितंत्र्यस्त्रिजायतइतिव्याख्याअत्रक्षेत्रफलानयनं॥अत्रतृतीयांशोष्टां
गुलानिमध्यसूत्रेयोजितानिजातोलंबः ३२ पश्चिमभुजेउभयतश्चतुर्थांशःषट्षडंगुलानियोजितानिजाता ३६ अत्रमुखाभावाद्भूमे
रर्द्धंकृतं १८ इदंलंबेनानेन ३२ निघ्नंजातंक्षेत्रफलं ५७६ समभुजतासद्यःक्षेत्रफलंचसिध्यतीतिकष्टोज्झितमित्युक्तंअत्रकिंचिद्गुणंवै

वन्ह्यंशंपुरतोविधायचपुनःश्रोण्योश्चतुर्थांशकंचिन्हेषुत्रिषुसूत्रदानतइदंस्यात्त्र्यस्त्रिकष्टोज्झितं॥ विश्वां
१३ शैःस्वजिनांशकेनसहितैःक्षेत्रेजिनांशेकृते व्यासार्द्धेनमितेनमंडलमिदंस्याद्वृत्तसंज्ञंशुभं ॥ ४१ ॥

षम्यंतरदोषायअत्रापिध्वजायएवेति अथोत्तरार्द्धेनवृत्तमाह क्षेत्रेचतुर्विंशतिभक्तेसतित्रयोदशांशैःस्वचतुर्विंशत्यंशयुतैःमिते
नव्यासार्द्धेनमंडलंयद्वृत्तंतद्वृत्तसंज्ञंकुंडंसुंदरंस्यात् अत्रपूर्तेत्रफलानयनंअत्रत्रयोदशानांचतुर्विंशांशोंगुलाद्यः०।४।२।५।३ अने
नयुतास्त्रयोदश १३।४।२।५।३२ इदंव्यासार्द्धंएतद्द्विसंगुणंव्यासः २७।०।५।२।६४ अत्रापिव्यासस्यवर्गेस्मिन् ७३३।४।१।० भनवाग्नि
निघ्नेपंचसहस्रभक्तेइत्यादिनाक्षेत्रफलं५७६।०।६।५अत्रलीक्षापंचकंयूकाषट्कंचाधिकमदोषाय।अत्रापिध्वजायएवेति ४१।

कुं·सि
१७

अथ षडस्रं स्रग्धरयाह क्षेत्रे चतुर्विंशतिधाभक्ते सति अष्टादशांशैः स्वद्वासप्ततितमांशयुक्तैस्तावता व्यासार्द्धेन मंडले कृते सति तेनैव
व्यासार्द्धेन मिते धृते गुणके सूत्रे सति कर्कटे वा उत्तरदिक्के धृते सति परावर्त्तनेन षट् चिन्हानि भवंति तेषु षट् चिन्हेषु षट् सूत्राणि एकां
तरेण परस्परलग्नानि दद्यात् ततः संधौ ऋतुदोषः षड्भुजाः तेषां नाशे वृत्ति कृते मंडलस्यापि नाशे षडस्रं नेत्ररमणीयं ज्ञायते इति व्याख्या।
अस्मिन्षडस्रे व्यासः ३६।४।० अत्रोतराग्रं त्रिकोणमेकं महत् तद्भुजमाना त्रिद्व्यंकाग्निनभश्चंद्रैः १०।३९२३ वृत्तव्यासे समाहते खखखा

भक्ते क्षेत्रे जिनांशेर्धृतिमितलवकैः स्वाक्षिशैलांशयुक्तैर्व्यासार्द्धान्मंडले तन्मितधृतगुणके कर्कटे वेंदुदिक्कैः
षट् चिन्हेषु प्रदद्याद्रसमितगुणकानेकमेकं तु हित्वा नाशे संध्यर्तुदोषामपि च वृतिकृते नेत्ररम्यं षडस्रं ॥४२।

भ्रार्कं १२०००० संभक्ते लभ्यंते क्रमशो भुजा ॥ इति त्रयाणां भुजानां मानं ३१।४।७।० उत्तराग्रात् पूर्वापरभुजमध्यं यावन्नीयमानं सू
त्रं लंबश्चतुर्थांशोनो व्यास एव २७।३।० भुज एव भूः मुखाभावात् भूम्यर्धं १५।६।३४ लंबेन निघ्नमित्यादिना जातं क्षेत्रफलं ४३२। तप:
५।१।६ अथास्य महतस्त्रिभुजस्य त्रिष्वपि भुजेषु त्रीणि अस्त्रीणि समान्येव लग्नानि संति तत्रैकस्य फलमानीय त्रिगुणं कृत्वा पूर्वफले योजि १०
[illegible]

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रदक्षिणकोणाग्रात्पूर्वापरभुजमध्ययावन्नीयमानंसूत्रंलंबः ९।१।० अयंव्यासचतुर्थांशः भुजत्र्यंशोभूमिः १०।४।२।३ सर्वत्र
त्र्यंशोएवभुजसंपातान् अत्रमुखाभावाद्भूमेरर्द्धं ५।२।१।१ इदंलंबेनगुणितंक्षेत्रफलं ४८।०।४।३ इदंत्रिगुणंत्र्यस्राणामपिफलं १
४४१।४६ इदंपूर्वक्षेत्रफलेस्मिन् ४३२।५।१।६ योजितं ५७६।६।६।४ इदंलीक्षाचतुष्कंयूकाषट्कंयवषट्कंचाधिकंअल्पांतरत्वाद्दोषः
अथवाव्यासोयूकयान्यूनःकार्यः ध्वजायसिद्धिश्चअथवाकिमेतावताप्रयासेनालघुविकोणेयत्क्षेत्रफलद्वादशांशस्तत्क्षेत्रफलं ४८।०।
४।२ एतद्द्वादशगुणंपूर्णंक्षेत्रफलंस्यात् अथेदंकुंडस्वबुद्धिविलासमात्ररचितमितिनोपेक्षणीयं।यतः षट्कोणतासमभुजताक्षे
त्रफलंचसंपद्यतएवामानाधिक्येभवेद्रोगोमानहीनेदरिद्रते। त्यादिदोषापत्तिरपिनास्तिअथवक्तव्यंप्राचीनकृतकुंड विरुद्धंतर्हि
दृश्यतेचप्राचीनकृतकुंडेषुपरस्परविरुद्धता इदमेवकुंडरामवाजपेयिभिर्विषमभुजमृदंगाकारंकृतंराघवभट्टादिभिःसमभुज
मेवकारितंलक्ष्मणाचार्यादयोप्यन्यथैवोचुःतस्मादस्मदुक्तेनेत्ररमणीयेसमभुजेक्षेत्रफलसंवादिनिषट्कोणेविद्वद्भिर्नानादरेणभा
॥ ॥ व्यमिति ॥४२॥ ॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथचेत्प्राचीनकृतावेवाग्रहितास्तेषांतोषायापिसमषट्भुजंषडस्त्रंवसंतमालिकयाह' अथवाचतुर्विंशतिभक्तेकुंडमानेसतिस्त्री यषष्ट्यधिकशतभागेनहीनैः पंचदशभागैर्मितोयः कर्कटस्तदुद्भेवेवृत्तेउत्तरदिक्तः सकाशात्समैः षड्भिर्भुजैर्दत्तैः परस्परलग्नैःषड स्त्रंवृत्तमार्जनेनभवतीतिव्याख्या।अथक्षेत्रफलानयनंतत्रवृत्तव्यासेद्विसंभक्तेषडस्रस्युर्भुजाः स्फुटाइतिभुजमानं १४।७।२ क्षेत्रम ध्येदक्षिणोत्तरांरेखांदत्वाऊर्ध्वभुजसंपाततः पूर्वापररेखाद्वयंअधोभुजसंपातावधिंदद्यात् एवंकृतेचतुरस्रद्वयंपरस्परलग्नंभव

॥अथवाजिनभक्तकुंडमानात्तिथिभागैः खखभूपभागहीनैः॥मि
तकर्कटकोद्भवेतुवृत्तेविधुदिक्तः समषड्भुजैः षडस्त्रं॥४३॥ ६॥

त्किमर्थंगौरवयुक्तिर्लिखितेतिवाच्यं॥अब्जप्रकरणेसर्वत्रसूत्रस्यैववृद्धत्वात्कर्कटस्याभावाच्च॥नन्वअवधिवलयेनैव
सर्वसिद्धंचेत्तस्यैवव्यासःकुतोनोक्तइतिचेन्न॥शतांगुलपरिमितव्यासकेवृत्तेवृत्तफलस्यपद्मफलस्यचैक्यात्॥लाघ
वाच्च॥तथाहि॥यद्ययमेवव्यासउच्येततर्हिअस्यापिइयंतोभागाःकार्याः॥तत्रद्वाभ्यांकर्णिकाएवंकेसरादिसर्वम
प्यवश्यंतयावक्तव्यंलाघवंकिमपिनास्ति॥नचअस्तुतर्हिसमानत्वमितिवाच्यं॥व्यासोन्यतोसर्वव्यासकथनावस राम
रेस्वपृथग्गंकोऽन्यादिर्गौरवात्।वस्तुतस्तुनामसदृशाकारस्यक्षेत्रफलस्यचसर्वत्रापेक्षानतुयस्मादंयाच्चतुरस्रादिकंकृतं ६
तस्मादेवपद्मादिकर्तव्यानीतिनियमः॥ अथवायस्मात्यथादिकृतंतस्मादेवचतुरस्रादिकार्यमित्यपि।किंतुना क

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कारस्मादृश्यस्यक्षेत्रफलस्यचनियमादेकस्मादेकमपरस्मादेकंकृतनपिदोषोनास्तीतिसिद्धं॥ अतएवकुंडसिध्यादेरष्टास्त्रादि
कंकुंडार्कादेःपद्यादिकंयाज्ञिकाःकुर्वंति॥ नचकुंडार्कपद्मस्याम्बुष्टदलाकारतासंपन्नाभवतीतिकथंनामसदृशाकारोभवतीतिवा
च्यम्॥ तनादृशःपत्राग्राकारःपद्मपत्रविशेषसत्वादितिसंक्षेपः॥ मंडलस्याष्टांशकरणेलाघवयुक्तिमाह। प्राचीतोर्धेनसूत्रेणष
ड्धामंडलमाभजेत्॥ द्वितीयस्यतृतीयस्यभ्रमात्कार्यौतुमत्स्यकौ॥ ताभ्यांसमानसूत्रेणदक्षिणोदक्कुटाभवेत्॥ चतुर्थंपश्चिमा
दिक्स्थादेवंदिक्चतुष्टयं॥ अन्योन्यदिक्सूत्रेणसाध्यंविदिक्चतुष्टयं॥ एवंषोडशभागादिकरणंतुयथारुचं॥ ७॥ अथकुंडनिवेश

वेदास्त्रंयोनिरर्धंवलयमनलदोर्वृत्तमंगास्त्रमब्जंवस्वस्त्रंचेन्द्रदिक्तःप्रथमचरमयोरंतरालेयुगास्त्रं॥ वृ
त्तान्याद्यानिवास्फुर्नवविदिशकृते पंचवास्युःप्रतीच्यामेकंकुंडंयदिस्यात्तुरहरदिशिवातानिवेद्याःपदांते८।

नस्यातान्याह॥ प्राचितोऽष्टदिक्षुक्रमेण॥ चतुरस्त्रं। योनिकुंडं। अर्द्धचन्द्रं। त्र्यस्त्रं। वर्तुलं। षडस्त्रं। पद्मं। अष्टास्त्रं। अष्टास्त्रचतुरस्त्रयो
रंतराले। एकंचतुरस्त्रंतदेवमुख्याचार्यकुंडं। इमानिसर्वाणिकुंडानिवृत्तानि। वाकर्तव्यानि। यद्वाचतुरस्त्राणिकर्तव्यानि॥ इति
नवकुंडपक्षे॥ विदिशकृतेपंचवास्युः॥ आग्नेयनिर्ऋतिवाय्वीशानकोणकुंडरहितेपंचसंख्याकानिकुंडानिस्वस्वदेशेएवका
र्याणि॥ यद्येकैवस्यात्तदाप्रतीच्यामुत्तरस्यांवेतिदेशविकल्पः॥ तच्चवृत्तंचतुरस्त्रंवाभवति। तदुक्तंक्रियासारे। उत्तरस्यांभवेत्कुंडं
॥ ॥वृत्तंवाचतुरस्त्रकमिति। एतानिवेदेःसकाशाद्वेदिचतुर्थांश॥ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिमितदेशमंतरालमुक्तान्तरं तरालांतेयथामेखला भवंति तथा सर्वाणि कुंडानि कार्याणीति॥एतेषां फलानि नित्या षोडश
शिकार्णवतंत्रे॥योनिकुंडे भवेद्वाग्मी भगेचा कृष्टिरुत्तमा॥वर्तुलेतु भवेच्छ्रीर्अर्धचंद्रेत्रयं भवेत्॥नवत्रिकोणकुंडेतु खेचर
त्वं प्रजायते॥चतुरस्रे भवेच्छांतिर्लक्ष्मीः पुष्टिररोगता॥पद्मा भे सर्वसंपत्तिरचिरादेव जायते॥अष्टकोणेतु सुभगे समीहितफ
लं भवेदिति॥शौनकपरिशिष्टेतु॥पद्मकुंडमपि सर्वकामनायामुक्तं॥सर्वकर्मसु वित्तेयं कुंडं पद्मनिभंतु यत्॥चतुरस्रं च सर्वत्र सम
लं भवेदिति॥शौनकपरिशिष्टेतु॥पद्मकुंडमपि सर्वकामनायामुक्तं॥
स्याद्विजपावहं॥सर्वशांतिकरं कुंडं पद्माकारं विशेषत इति कोटिहोमपद्धतौ०॥ पा कुंडलसिध्यर्थं कुंडांगान्याह॥ खातमिति ॥

खातं कुंडाभमानं जिन२४लवगलतः स्युर्बहिर्मेखलास्तानंदां९ग६द्व्युरु३च्च वेद४त्रि३कर२ विततयो
शोच्चनाभिर्हि पृष्ठा॥स्वाभानाब्जभावा वसु८नव९लवकव्यासदैर्घ्यातु योनिः पश्चान्नालाग्रगा नोभगउ
परिभुवाग्नेण कुंडं विशंती॥ १०॥ ११ खातं कुंडाभमानं कार्यं। आभं च मानं च आभमाने। कुंडवदाभमाने यस्य तत
यो क्तः॥ चतुरस्रकुंडे चतुरस्राकारं। वृत्ते वृत्ताकारमित्यादि मानमपि हस्तमात्रे कुंडे हस्तमात्रमित्यादि॥हस्तोप्यत्र चतुरस्रस्य
यो क्तः॥चतुरस्रकुंडे चतुरस्राकारं। वृत्ते वृत्ताकारमित्यादि मानमपि हस्तमा त्रकुंडे हस्तमात्रमित्यादि॥ योन्यादिषु तयोर्नाना त्वात्॥
चतुर्विंशत्यं गुलपरिमितः। एवमग्रे कंठमेखयोन्यादिषु चतुरस्रस्यैवायामविस्तारौ ग्राह्यौ॥ योन्यादिषु तयोर्नानात्वात्॥
चतुर्विंशत्यंगुलपरिमितः। एवमग्रेकंठमेखयोन्यादिषु चतुरस्रस्यैवायामविस्तारौ ग्राह्यौ॥
चतुर्विंशत्यं गुलपरिमितः। एवमग्रे कंठमेखयोन्यादिषु चतुरस्र
तत्राद्यमेखलयासह कुंडमानं॥यद्वा भूमितोधोहस्तमात्रं॥अत्राद्यपक्षे संमतिः॥ खातं कुंड प्रमाणं स्यादूर्ध्वं मेखल
यासहेति॥सिद्धांतशेखरे॥द्वितीयपक्षे संमतिः॥ आदिसारस्वते॥ चतुरस्रं चतुष्कोणं सूत्रैः कृत्वा यथापुरा॥हस्तमात्रेण त
न्मध्ये तावन्निम्नायतं खने॥दितिकादिमते॥ प्रोक्तानां सर्वकुंडानामरत्निः खातमानकमिति॥आगमांतरेपि॥यावन्मानः कुंड



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विस्तारउक्तस्तावत्त्वात्तस्यापिमानंप्रदिष्टमिति॥अत्रबहूल्पहोमानुसारेणव्यवस्था।तदुक्तंकुंडकल्पद्रुमकारेण।सर्वेषुचतुर्भुजे
षुविस्तारस्तुल्येखननेनवदंति।यदाद्ययामेखलयासहोक्तंतदस्यहोमेपरिचिंतनीयमिति।चतुर्विंशांशपरिमितकंठाद्बहिर्मेखलाभवंति।
तत्राद्यामेखलाऽष्टांगुलोच्चा चतुरंगुलविस्तारा।तस्माद्बहिर्द्वितीया षडंगुलोच्चात्र्यंगुलविस्तारा।ततोपिबहिस्तृतीयात्र्यंगुलोच्चाद्व्यंगुलवि
स्तारा।नाभिस्त्वेकेनांशेनोच्चाद्वाभ्यांपुष्टाविस्तारेत्यर्थः॥तस्याआकारस्तुस्वस्वकुंडवत्।पद्मकुंडेनकर्तव्या।तत्रकर्णिकायाःसत्वा
त्।सर्वेषुकुंडेषुपत्ररहितेषुपद्माकारावाकर्तव्या।अयंचनाभिशब्दःपुल्लिंगेस्त्रियांच।आतपेक्षत्रियेनाभिःप्रायशोपिद्वयोरपी
तिकोशदर्शनात्।इतिकुंडकल्पलतायां॥योनिस्तुत्र्यष्टिमिश्चतुर्विंशांशैर्विस्तारात्नवभिर्दीर्घोपरस्परवधेनयत्फलंउत्पद्यतेतत्फ
लकायोनिःकार्येत्यर्थः।तस्याआकारःपूर्ववत्कृतेव्यञ्जनुबसुनवलवक्रव्यासदैर्घ्येस्तुतयाकथंतत्फलकायोनिःकार्येतिलब्धमिति
चेन्न।षष्ठ्यस्यंगुलफलकादौसर्वत्रतथादृष्टत्वात्॥दीर्घासूर्यांगुलायोनिस्त्र्यंशोनाविस्तरेणतु।इत्यादिवाक्येऽभ्यत्रस्पष्टांगुष्टविस्तारोन
स्वीकृतः।किंतुषष्ठ्यंगुलक्षेत्रफलंयथाऽऽयाति॥ तथैवविस्तारदीर्घतासर्वैरपिस्वीकृतत्वाच्च।नचात्रद्विसप्तत्यंगुलफलकयो
निकरणेप्रमाणाभावइतिवाच्यं।मदनरत्ने।कृत्स्नचतुर्दशीशांतेगर्भः।योनिंषडंगुलांतिर्यक्द्वादशांगुलदैर्घ्यकां॥अश्वत्थदल
संकाशांकिंचिदुन्नमितामिति।वृद्धवसिष्ठेः।योनिश्चपश्चिमेभागेप्राङ्मुखीमध्यसंस्थिता।षडंगुलैश्चविस्तीर्णाचायताद्वादशा
गुलैरिति।कुंडकल्पद्रुमटीकाकारेणप्रमाणस्योक्तत्वात्।तस्याःसाधनंतु॥

For Private and Personal Use Only

च्यते॥फलं द्विसप्तत्यंगुलपरिमितं ७२ इदमयुतगुणितं ७२०००० अयं सार्द्धत्रिनवकररसैर्भक्तव्यः ९।२।९।३।४ भक्ते लब्धं ११४॥
अस्य मूलं १०।५ अयमेव योनेर्व्यासः।अस्मिन्व्यासे योनिकुंडवत्क्षेत्रं कृतं चेत्तादृशफलका योनिर्भवति।अयमेवाभिप्रायेण रघु
वीरटीकाकारेण तस्या आकारः पूर्ववत्कर्त्तव्य इत्युक्तम्॥अन्यथा पूर्ववत्करणं कया परीत्या न संभवति॥फलनिष्कासनं तु यो
निकुंडवदित्यलं॥यद्वास्यार्थः॥वसुनवचतेलवकाश्च।वसुनवलवकाः।वसुनवलवकानां व्यासः॥वसुनवलवकव्यासः ॥
वसुनवलवकव्यास एव दैर्घ्यं यस्याः सा।वसुनवलवकव्यासदैर्घ्या॥ अष्टनवति ९८ क्षेत्रफलस्य यो व्यासः॥ स एव दैर्घ्यं
यस्याः सा इत्यर्थः॥अनेन व्यासेन योनिकुंडवत् योनिकरणे विस्तारस्यार्थसिद्धत्वेन विस्तारो नोक्तः॥ व्यासानयनं त्वेवं॥फलद
शसहस्रगुणितं॥९८०००००॥भाजकस्तवर्णार्थं मष्टगुणितं॥७८४०००००॥अयं भाज्यः॥सार्द्धत्रिनवकररसाः ९।२।९।३।४।
भाजकोपि सवर्णितः॥५०३४८॥अनेन भक्ते लब्धं १५५॥अस्य मूलं॥१२।३।५।५।अनेन व्यासेन योनिकुंडवत् योनिः कार्येति
तात्पर्यार्थः॥ननु यथा॥षष्णवति फलका योनिः कार्येति बहुभिरुक्तम्॥ न हृत॥अष्टनवति फलका कार्येति।क्वापि नोक्तं
तत्कथं तत्फलका कार्येत्युक्तमिति चेन्न॥योनेर्विस्तारस्यानेकविधत्वेन कुंडक्षेत्रफलस्य यथावश्यकता॥ तथा योनेः फल
स्यावश्यकत्वाभावात् ॥किंतु॥योनिकुंडवद्योनिकरणार्थमेतस्या युक्तेरुक्तत्वात्योनेरनेकविधत्वं कोटिहोमपद्धत्यादावु
क्तं॥वितस्तिमात्रा योनिः स्यात्षट्सप्तांगुलविस्तृतेति ॥मेखलामध्यतो योनिः कुंडार्धात्र्यंशविस्तृतेति।इति त्रिविधः।



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

वद्गचतुर्दशांगुलायामविस्तारेत्वतिशालिनीमि। शारदावाक्यव्याख्याकुंडकल्पलतायां। षट्चतुर्दशांगुलत्वमायामा दिषु प्रत्येकं
संबध्यते। तेन द्वादशांगुलदीर्घानावद्विस्तृतानावदुन्नतेति। एवंष एवतिफलका योनिकरणे तु मूलोक्तविस्ताराद्भिन्नत्वंस्य श्रम॥
अतो विस्तारानुसारेण फलमपि भिन्नं। तत्र कस्मिन्कुंडे कावा योनिः कार्येति व्यवस्थापा अभावात्। सर्वेषु कुंडेषु सर्वासां योनीनां प्रा
प्या योनेः फलस्यानावश्यकत्वं। न च बहुषु ग्रंथेषु द्वादशांगुलं दैर्घ्यमुक्तं। अत्र तु किंचिन्न्यूनं च तुर्थवाधिकं॥ तस्य किं प्रमाणमस्ती
ति वाच्यम्॥ एतस्यापि प्रमाणस्योक्तप्रायत्वात्। तथाहि॥ वत्नाईद्वयमग्रे चैकोशरूपमितो। भिन्नं वोध्यमिति कोरिहोमपद्धता
वुक्तं॥ इतः द्वादशांगुलप्रमाणादित्यर्थः॥ कुंडोद्योतेतु॥ द्वौ कुंभौ भागद्वयेन दीर्घां मेखलांतनव भागाः अग्रतः प्रविष्ट एको भागः
॥ एवं द्वादशभागैर्दीर्घा कार्येति॥ एकैकांगुलतो योनिं कुंडे ध्वन्येषु वर्धयेत्॥ यावद्द्व्यक्रमेणैव योन्यग्रमपि वर्धयेदिति वाक्येन
योनिदैर्घ्यादग्रं भिन्नमिति स्पष्टतया सिद्धं॥ अग्रमानमपि विकल्पेनोक्तं॥ त्रिभागां मध्यतो योनिमायामे द्वादशांगुलां॥ द्वाद
शांशोच्छ्रितां कुर्यात्किंचित्कुंडनिवेशिनीमिति प्रयोगसारस्थवाक्ये कल्पलताकारेण किंचित्पदमेकांगुलपरमिति व्याख्या
तं॥ सिंह सिद्धांतकारेण यथाश्रुतमेव स्वीकृतं॥ तद्यथा॥ मेखलाकथनानंतरं सर्वबाह्यस्थमेखलाया बहिश्चतुरंगुलाया
मविस्तारोत्सेधं चतुरस्रपीठं मृदा कृत्वा तदुपरि निहितमूलद्वादशांगुलदीर्घोत्तरोत्तरहीनपरिणाहमध्यमेखलासंलग्नसंध्र
नालयुतां मूले कुंभद्वययुतां मध्ये सगर्तामुपरितनमेखलोपरिगतामष्टांगुलमानविस्तारमूलांतप्रदेशां कु॥ ७॥ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

कुं०टी० भयपार्श्वतः॥क्रमेण संकुचितामेकांगुलविस्तारमतो द्वादशांगुलमायामामेकांगुलोत्सेधमेखलायुक्तामश्वत्थपत्राकारां मूलात्किं
१२ चिदुन्नमात्॥न्यूनामीषत्कुंडप्रविशन्तीं योनिं कुर्यादिति सिंहसिद्धांतनामकतंत्रशास्त्रग्रंथे॥तथा चास्माभिः किंचित्परदस्यांगु
लप्रकरणादंगुलादल्पत्वं यवानामेव प्रमाणं स्वीकृत्येदमुक्तमिति सर्वं समंजसं॥ केश्चिदष्टांगुलविस्तारः॥ नवांगुलाया
मइत्येवार्थः कृतः॥तथा च॥कंठप्रागंतात्पश्चिमे षडंगुले देशे केंद्रं मत्वा वृत्ते कृते द्वादशांगुलव्यासवृत्तं भवति॥ ॥
तस्मिन्वृत्ते योनिकुंडवत्पश्चाद्वृत्तार्द्धद्वयं कार्यं॥ वृत्तार्धद्वयस्य पूर्वांताभ्यां कंठप्रागंतात्प्राक् उपरिभूम्या मध्यांगुलवर्धितयोन्य
ग्रपर्यंतं सूत्रद्वयं देयं॥ पश्चान्नालं सच्छिद्रं॥ पश्चिमतो योन्युपरि कुंभाकारं गोलद्वयं निधेयं॥ मध्ये कूर्मपृष्ठोन्नतं॥ योन्यु
परि सर्वत्र एकांगुला मेखला प्राक्प्रवणार्थं पश्चात्किंचिदुच्चा एवं योनिः कार्येति दिक्॥ पूर्वाग्नियाम्यकुंडानां योनिः स्यादुत्तरानना
॥पूर्वाननात्तु शेषाणामीशान्येन्यतरानयोरिति क्रियासारे॥ तस्याः पश्चान्नालं सच्छिद्रं कार्यं॥ आम्रगा॥ अग्रेण गच्छतीत्याम्र-
गा॥ अधोभागादुपरिभागो यथा सूक्ष्मो भवति तथा कर्तव्येत्यर्थः॥ प्राक्प्रवणा च॥ अग्रशब्दस्योभयनिष्ठत्वात्॥ नोभगे॥ यो
निकुंडे योनिर्न कार्या॥ एकेनांशेन मेखलोपरि उच्चा सकेनाग्नभागेन कुंडमध्ये प्रवेशयितव्या॥ ६ ॥ अथ मंडपं वृत्त एम०
त्रयेणाह॥ ॥अत्र मंडपशब्देन भूमिस्तंभवलिकादिसमुदायः॥ अन्यथा दशहस्तादिसंख्याया असंभवः स्यात्॥ नवखंडक १२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रणस्य सर्वथैवासंभवाच्च। समंडपो दशहस्तो द्वादशहस्तश्चाल्पः॥ द्वादशहस्तश्चतुर्दशहस्तः समो मध्यमः। षोडशहस्तोऽष्टादशह
स्तोऽन्यः श्रेष्ठः। द्वादशहस्तो भयकोटिपातः एककुंडकरणपक्षे द्वादशहस्तो मध्यमः। पंचकुंडकरणपक्षेऽल्प इति ज्ञापनार्थः॥ चक्र
मूलमध्यमात्ममानप्राप्तिस्तुस्यैव। तुल्यांभोदोद्दीति। तुल्यानि अंभोधिः चत्वारि दोषाः भुजाः यस्मिन् सः तुल्यांभोभोदोः तस्मिन् तु
ल्यांभोदोष्णि समचतुरस्र इत्यर्थः। अस्मिन्मंडपे चतुर्भिश्चतुर्भिः स्तंभैर्नव खंडास्तुल्यप्रमाणाः कार्याः तेषां मध्ये मध्यमो वेदिः सा च
पंक्त्यर्कैः १०।१२। अर्कशाक्रैः १२।१४ नृपतिधृतिकरैः १६।१८ मंडपोऽल्पः समोऽग्र्यस्तुल्यांभोधिदोष्णि खंडा
इह नव सुसमा मध्यमो वेदिरेषां॥ हस्तोच्चा खंडकोणेष्विभकरमुदरे पंचहस्तं वहिश्च स्तंभोद्यो
द्वाष्ट १६ संख्यं मुविशरपलवनः स्वयमन्यत्र चैवं॥१०॥ सर्वेष्वपि मंडपेषु हस्तोच्चा कर्तव्या। खंडकोणेषु ह
न संपातस्थानेषु षोडश स्तंभानि स्वयाः। सूत्रसंपातस्थानानां षोडशसंख्यात्वात्। मध्यखंडकोणचतुष्टये अष्टहस्ताः बाह्यकोणेषु द्वा
दशसंख्याकेषु पंचहस्ताः॥ इयमुच्चता॥ वैपुल्यमस्यान्यतोऽग्राह्यत्वेन कुंडाशे मस्यमुच्यते॥ सूत्रेण पंक्त्यंगुलविस्तरेणेन संबे स्त्र्यमा
नाविपुलास्तु सर्वे॥ यद्यपीदं स्थूलत्वं तोरणस्तंभानधिकृत्योक्तं शारदायां॥ दशांगुलप्रमाणेन तन्परीणाहः ईरितः इति न
थाप्यन्यत्रानुक्तत्वात्सामान्यादितरेषु तथात्वमिति न्यायान्सर्वेषामिदमेव॥ यत्तु पदार्थादर्शे॥ परीणा——॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वाविंशत्तनेनिकोशात् ॥ दशांगुलव्यासपरिधिपरिमाणास्थूलादप्युक्तं तच्चिंत्यं ॥ नच परीणाहशब्दोऽनुपपन्नः। अनेकार्थे
परीणाहशब्दस्यात्र परिधिवाचकत्वात् ॥ दृष्टं च ॥ लिंगमस्तकविस्तारो लिंगोच्छ्रायसमो भवेत् ॥ त्रिगुणः परिणाहस्स्यादित्यादौ
परिधिवाचकस्य दृष्टत्वात् ॥ एवमेव तुलापट्टतो नडागोत्सर्गपद्धतौ च श्रीमज्जगद्गुरुभट्टचरणैरप्युक्तमिति दिक् ॥ एषां ख
ननं स्वस्वपंचमांशेन ॥ अन्यत्रापि ॥ चक्रशूलादिष्वपि पंचमांशेनैव खननं ॥ ननु खड्गकोणेषु स्तंभदानोक्तत्वात्तेषां षोडशसंख्या
त्वादर्थास्तंभानां षोडशसंख्याप्राप्तौ पुनर्द्वात्रिंशसंख्यमिति संख्योक्तिः किमार्थमिति चेन्न ॥ महामंडपे स्तंभांतरस्यापि
महत्त्वात्तत्र मंडपदृढीकरणाय काष्ठांतरदानस्य युक्तिसिद्धत्वात्तादृशकाष्ठानां मंडपान्तःपातित्वं नास्तीति ज्ञापनार्थत्वात् १०
॥ द्वात्रिंशत्स्तंभचूडास्ववनयवलिकास्ता जिनाः २४ खड्गवाहुष्वष्टौ सुमंडपस्य श्रुतिषु सशिखरोमध्यभा
गोस्य यस्मात् ॥ हिसुद्वारो द्विहस्ता उपरि चतुरिभैरंगुलैरोधिताः स्यूर्भास्तभध्वजाद्यैः कटपिहितममुं शोभ
यांभो घटाद्यैः ॥ ११ ॥ ११ अत्र सर्वेपि स्तंभाः सचूडाः कर्तव्याः ॥ तासु चूडासु द्वात्रिंशत्संख्याकानि उभयतः ॥ सच्छिद्रा
णि नतत्स्तंभांतरप्रमाणानि बलिकाख्यानि काष्ठान्यवनयेत् ॥ तत्र चतुर्भिर्वलिकाभिर्वेदिकोणगतस्तंभचतुष्टयं ग्रंथनीयं एवं त्रिभि
स्त्रिभिर्वलिकाभिः प्रतिदिशमाग्नेयकोणमारभ्य पुनराग्नेयकोणपर्यंतं स्तंभद्वादशकं ग्रंथनीयं सर्वत्र मंडपस्य प्रदक्षिणा कार्येत्या
आग्नेयमारभ्य कर्तव्यमिति नियमात् ॥ अत्रार्थे संमतिः ॥ विन्यसेद्वेदिकोणेषु स्तंभान्वेदस्वरूपकान् ॥ आग्नेयादिक्रमेणैवेति। वे
दिकोणेष्विति उपलक्षणं ॥ उक्तं च ॥ स्तंभोच्छ्राये शिलान्यासे सूत्रयोजनकीलके ॥ खननावट ॥ ॥ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संस्कारस्त्रारंभो बहिर्गोचर इति॥ एतेन वाह्यस्तंभनिवेशनाद्यपि नैनैव क्रमेण भवतीत्यर्थः॥ एवं वाह्याग्नेयकोणस्तंभात् वेदिगताग्नेयकोणस्तंभपर्यंतमेकं वलिकारव्यं काष्टं कर्णरूपं निधेयं॥ बाह्यकोणस्तंभसमीपस्थस्तंभद्वयादारभ्य वेदिकोणगताग्नेयकोणस्तंभपर्यंतं बलिकारव्यं काष्टद्वयं निधेयं। एवं कोणत्रयेपि एवं च तस्तभिर्वलिकाभिर्मध्यशिखरभागो यथा भवति॥ तथा कर्तव्यः॥ तथा च द्वात्रिंशद्बलिकाख्यानि काष्टानि भवंति॥ अस्य मंडपस्य प्रतिदिशं मध्ये द्वाराणि कर्तव्यानि तानि चालामंडपे द्विहस्तानि॥ मध्यमे चतुरंगुलाधिकद्विहस्तानि॥ उत्तमेऽष्टांगुलाधिकद्विहस्तानि॥ तानि शाखोदुंबरसहितानि॥ उक्तं च॥ तेषां मध्यकाष्टानां चोपरि आच्छादनायान्यानि काष्टानि देयानि दिङ्मध्यसूत्रं च द्वारं मध्यं प्रकल्प्य ततश्चतुरंगुलाधिकहस्तप्रमाणमुभयतो गृहीत्वाष्टांगुलाधिकद्विहस्तविस्ताराणि देहल्युत्तरंगद्वारशाखायुतानि प्रागादियानानि चत्वारि द्वाराणि कृत्वा तदूर्ध्वं परितउपरि च सत्कटैर्मंडपश्छाद्यः॥ नारायणभट्टकृत जलाशयोत्सर्गे॥ कनीयसं द्विकरं स्याच्चतुरंगुलवृद्धितः मध्यमोत्तमयोर्द्वारं शाखोदुंबरसंयुतमिति॥ अमुं मंडपं द्वारवर्जं कटपिहितं कदलीस्तंभध्वजाद्यैः॥ आमोघपटाद्यैश्च शोभय॥ शोभायुक्तं कुर्वित्यर्थः॥ प्रथमाद्यपदेन पताकादीनां संग्रहः॥ नास्तु कुंडोद्योतटीकयोः॥ पीतारक्ता श्यामा कृष्णा श्वेताथधूम्रहरितेस्ताः॥ रक्तेस्य शैदिक्षु प्रागीशान्यांतरे भ्रनिभारक्तारसौवुपयोस्त्र स्तासना मुनिकरदीर्घास्ताः॥ मुनिलवविस्तृतिमस्योदशकरवंशैः॥ पताकास्तुः॥ अथकर पंचकदीर्घा वितति द्विकराध्वजाश्चतुष्कोणाः॥ मध्येसकिंकिणिको॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्वज स्य दीर्घो भवेद्दंश ॥ रंभास्तंभैराम्रपत्रतोरणैः कुसुमैः फलैः ॥ चामरोल्लोचमुकुरैर्मंडनीयोथ मंडपः ॥ उल्लोचो वितानः ॥ द्वितीयाद्युप
दंतु ध्वजादिशोभानंतरमेव घटा नयनमिति ज्ञापनाय ॥ ११ ॥ अस्मान्मंडपाद्बहिः हस्तमितप्रदेशे तोरणाः कर्तव्याः ॥ अधममध्यमो
त्तममंडपेषु पंच ५ षट् ६ सप्त करा ७ अश्वत्थोदुंबरप्लक्षन्यग्रोधकाद्रुवाः प्राच्यारभ्योदीच्यंतं क्रमेण ॥ तस्यैकैकस्य मूर्ध्नि तत्तदर्धेन
फलकास्वस्वकाष्ठजा निधेयाः ॥ विष्णुयागश्चेत्तत्फलकमध्ये प्राच्यादिक्रमेण शंखचक्रगदाम्बुजं निखेयं तत्पक्षस्य पात्तु ॥ अधममं
डपे दशांगुलमिताः कीलाः शंखादिचिह्निताः स्वचतुर्थांशेन पुष्टाः ॥ एवं मध्यममंडपे द्वादशांगुलमितदीर्घाः ॥ उत्तमे चतुर्दशांगु

हस्तांते तोरणोस्मादिषु ५ षड् ६ गा ७ करो ऽश्वत्थोदुंबरोस्य प्लक्षन्यग्रोधजः प्राक्प्रभृतिषु फलकास्वार्ध
तोमूर्ध्नि तस्य ॥ तन्मध्ये विष्णुयागे दशरविमनुभि १० । १२ । १४ श्चांगुलैः स्वांघ्रिपुष्टः शंखचक्रगदाब्जं
भवति शिवमखे शूलमेकांगुलोनं ॥ १२ ॥ २२

लमितदीर्घाः ॥ विस्तारस्तु स्वस्वचतुर्थांशेनैवरोपपणं तु पंचमांशेनैवे
ति ॥ पूर्वमुक्तं शिवयागे तु ॥ त्रिशूलमेकांगुलोनं ॥ अधमे नवांगुलं ॥ मध्यमे एकादशांगुलं ॥ उत्तमे त्रयोदशांगुलमिति विशेषः ॥
॥ १२ ॥ अथेष्टफलकव्यासानयनप्रकारमाह ॥ अयुतगुणादिष्टफलात् ॥ चतुःपंचाशतोनराष्ट्रसप्ततिशत्याभक्ते लब्धं पद्भवतित
स्य मूलं वृत्तव्यासो भवति ॥ सार्धत्रिनवतिसहितया द्विषष्टिशत्या भक्ते यल्लब्धं भवति ॥ तस्य मूलं योनेर्व्यासः ॥ एवं सर्वत्र ॥ तत्र
त्र्यस्रादिभाजकानाह ॥ सार्धसप्तचत्वारिंशदुत्तरद्वात्रिंशच्छत ॥ नि ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पंचसहस्राणि चतुर्भुजस्य॥ यवद्वययुत चतुश्चत्वारिंशदुत्तरैकोनषष्टिशतानि पंचभुजस्य॥ पंचनवत्याधिकचतुःषष्टिशतानि
षड्स्य॥ एकचत्वारिंशदधिका सप्तषष्टिः सप्तभुजस्य। एकसप्ततुनरसप्ततिशतानि अष्टभुजस्य॥ अथ बालबोधनार्थमुदाहर
णं लिख्यते॥ तत्र फलमेकहस्तस्य॥ ५७६॥ अयुतगुणितं ५७६०००० ॥७८५४ अनेन भक्ते लब्धं ७३३।२ अस्य मूलं।
२७।०।६ द्विहस्ते॥ अयुतगुणं फलं॥ ११ ५२०००० उक्तभाजके॥ न भक्ते लब्धं १४ ६६।६। अस्य मूलं ३८।२।३ त्रिहस्ते फल

वृत्तेऽब्धीषुविभाग्ये ७८ ५४ युतगुणफलाल्लब्धमूलेन वृत्त व्यासो यो नौतु सार्धत्रिनवकररसैः ६२
१०३।४ साईसप्ताब्धिदंतैः ३२४७।४। स्वाभ्राभ्रार्थैः ५००० सहांघ्रिश्रुतिकनवशरैः ५९४४।२ धीनवांभोर
सैः ४६४ ९५ क्ष्माब्धीभर्तुभिः ६८४१ भूनगगगनगैः ७००७१ श्चक्रमात्र्या द्विदोःषु॥ १३॥ ॥

मयुतगुणं १७२८०००० पूर्ववद्भक्ते लब्धं॥ २२००१ अस्य मूलं १४६।७।१२॥ चतुर्हस्तेऽयुतगुणं फलं। २३०४०००० प्राग्वद्भक्ते लब्धं २९
३३।४॥ अस्य मूलं ५४।२ पंचहस्तेऽयुतगुणं फलं। २८८०००० ॥ उक्तरीत्या भक्ते लब्धं॥ ३६ ६६।७। अस्य मूलं ६०।४।३। षड्ढस्तेऽयुत
गुणफलं। ३४ ५६०००० उक्तप्रकारेण लब्धं॥ ४४०।२ अस्य मूलं॥ ६६।३॥ सप्तहस्ते फलमयुतगुणं ४०३२०००० उक्तपथे लब्धं ५१
३३।५। अस्य मूलं। ७१।५।१ अष्टहस्तेऽयुतगुणं ४६०८०००० उक्तवत्कृते लब्धं ५८ ६७ अस्य मूलं। ७६।४।६। नवहस्ते युतगुणफलं ५१८

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तांकेनभक्तेलब्धं ६६९०।३ अस्यमूलं ८१।२ दशहस्तेऽयुतगुणं ५७६००००० पूर्वोक्तांकेनभक्तेलब्धं॥ ७३२३।६। अस्यमू
लं ८५।५। एवमेकादशगुणितादौ द्रष्टव्यं॥ अथार्द्धचंद्रेइदमेवभाजकमर्धीकृत्यभक्ते॥ यद्वा फलंद्विगुणितंकृत्वा तेनैवभा
जकेनभक्तंचेदिष्टफलकव्यासोभवति॥ यथाइष्टफलमयुतगुणं॥ ५७६०००० ॥ ३८९२७॥ अनेनभक्तेलब्धं॥ १४ ६६।६
अस्यमूलं॥ ३८।२।३। यद्वाफलंद्विगुणितंसदयुतघ्नं॥ ११५२०००० ॥ ७८ ५४॥ ॥ अनेनभक्तेलब्धं॥ १४॥ ६६ ॥
६॥ अस्यमूलं॥ ३८।२।३॥ द्विहस्ते ॥ ११५२००० फलं॥ भाजकः ३९ २७ लब्धं २९३३।४ मूलं॥ ५४।२।४॥ त्रिहस्तफलं १७
२८०००० लब्धं ४४००।२ मूलं ६६।२।५ चतुर्हस्तेफलं २३०४०००० लब्धं ५८६७ मूलं ७६।४ पंचहस्तेफलं। २८८००००
लब्धं ७३३३।६ मूलं ८५।५। षड्हस्तेफलं॥ ३४५६००००॥ लब्धं ८८००।४। मूलं ९४ सप्तहस्तेफलं। ४०३२०००० लब्धं।
१०२६७ मूलं १०१।२।५॥ अष्टहस्तेफलं॥ ४६०८०००० लब्धं ११७३४ मूलं १०८।२।४॥ नवहस्तेफलं॥ ५१८४००००॥१॥
लब्धं॥ १३२०० मूलं॥ ११४।३ दशहस्ते॥ ५७६००००० लब्धं॥ १४६६७।४ मूलं १२१॥ अथयोनिकुंडे॥ एकहस्तेफलं॥ ५७६०
००० पूर्वोक्त भाजकेनभक्तेलब्धं॥ अयंभाजकः ६२९३।४। अयमष्टगुणितो यवरूपः संपन्नः॥ ५०३४८॥ फलमप्य
ष्टगुणितं॥ ४६०८०००० यवरूपेणभाजकेनभक्तेलब्धं ९१५।१।७ अस्यमूलं ३०।२॥ अत्रसर्वेषुवृत्तादिकेषुकुंडे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षु द्व्यादिगुणेषु सत्सु व्यासोत्पत्तौ उक्तोपायस्य गुरुभूतत्वात् लघूपायोंतरमप्युच्यते तदर्थं मदीयश्लोकः॥ इष्टफले द्व्यादिगुण्य इष्टवर्गे
तथैव तं॥ कृत्वा मूलेन यन्माप्तं तदेव द्व्यादिविस्तरः॥ अस्यार्थः॥ स्वकीये मिष्टफले द्विगुणित चतुर्गुणितादि कर्तव्ये सति तं इष्टवर्गं
तथैव कृत्वा॥ हस्तादिकुंडगत व्यासवर्गे द्विगुणित त्रिगुणित चतुर्गुणितादिकं कृत्वा तस्य मूलेन यन्माप्तं भवति॥ तदेव द्विगुणि
तादीनां विस्तरः॥ विस्तार इत्यर्थः॥ व्यास इति यावत्॥ उदाहरणं॥ इष्टवर्गः योनिकुंडगतव्यासवर्गः॥ ९१५॥१॥७॥ ॥
द्विगुणितः १८ ३०।३।६ अस्य मूलं॥ ४२।७ त्रिहस्ते त्रिगुणितः॥ २७ ४५।१५।५। अस्य मूलं ५२।३।१ चतुर्हस्ते। चतुर्गुणितः ३६६०
।७।४ मूलं। ६०।४। पंचहस्ते पंचगुणः।४५ ७६।१।२ मूलं ६७।५।१ षड्हस्ते षड्गुणः ५४ ९१।३।२ मूलं ७४।०।७ सप्तहस्ते सप्तगु
णः ६४ ३७।१ मूलं। ८०।२ अष्टहस्ते। ७३ २१।७ मूलं ८५।६ अस्त्रिकुंडे व्यासवर्गः १७७३६ अस्य मूलं ४२।१ द्विहस्ते द्विगुणः ३५
४७२ मूलं ५९।४।३ त्रिहस्ते त्रिगुणः ५३ २१ मूलं ७२।७।४ चतुर्हस्ते चतुर्गुणः ७०५४।४ मूलं ८३।७।७२ पंचहस्ते पंचगुणः ८८
६८ मूलं ९४।१।३ षड्हस्ते षड्गुणः १०६ ३९।६ मूलं १०३।१।१ सप्तहस्ते सप्तगुणः १२४१५।३ मूलं १११ ३ अष्टहस्ते ऽष्टगुणः १४१८
९ मूलं। ९१९।१ चतुरस्रव्यासवर्गः। ११५२ अस्य मूलं ३३।७।४। द्विहस्ते द्विगुणः।२।३०४ मूलं।४८ त्रिहस्ते त्रिगुणः।३४५६॥ मू
लं ५८।६।२ चतुर्हस्ते चतुर्गुणः ४६०८ मूलं ६७।७ पंचहस्ते पंचगुणः ५७५० मूलं ७५।६।५ षड्हस्ते षड्गुणः ६९१२ मूलं ८३।१।१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुं०टी० सप्तस्तेसप्तगुणः॥८०६४।मूलं८९।६।३।अष्टहस्तेऽष्टगुणः ९२१६ मूलं ९६ पंचाम्रव्यासवर्गः ९९६८ अस्यमूलं ३१।१।१।द्विहस्तेद्विगुणः॥
१६ १९३८॥ मूलं४४।०।२ त्रि०२९०७ मूलं॥५४॥ चतु०। ३८७६॥ मूलं॥ ६२।२।पंच०॥ ४८॥ ४५ मूलं६९।षट्हस्ते०।५८।१४ मूलं७६।
१सप्त० ६७८३।मूलं८२।३ अष्ट०।७७५२।८८।०।३ षडस्रव्यासवर्गः।८८६।६।५ अस्यमूलं२९।६द्विहस्ते०।७७२।५।२मूलं॥४२॥१॥
त्रिहस्ते०२६९० मूलं ५१।०७चतुर्हस्ते३५७१।२।४।मूलं।५९।६ पंच०४४३४।१।मूलं६६।४।५ षट्०५३२१मूलं१७२।७।५।सप्त०।६२०७॥
।६।३मूलं।७८।६।३।अष्ट०७०९४।५ मूलं।८४।९७सप्ताम्रवर्गः८४७।मूलं२९द्विहस्ते०१६९४ मूलं४१त्रिहस्ते०२५२४॥५॥ मूलं॥
५०।२।चतुर्हस्ते०३३६७ मूलं५८पंच॥४२०९।३।६४।७।षट्०५०५१मूलं७१।०५।सप्त०५८९३।१मूलं७६।६।अष्ट०६७३५।मूलं।
८२।०।४।अष्टास्रवर्गः॥८१४।४॥मूलं२८।४।द्वि०१६२९मूलं०४०।३त्रि०२४४ ४३।४मूलं४९।३।४।च०३२५८ मूलं५७।०।५पंच
४०७२।४मूलं६३।६।४ष०४८८७मूलं०६९।७।२स०५७०१मूलं७५।४अष्ट०६५१६मूलं८०।५॥ अथहस्तादिसर्वकुंडानां फल
मानयनेऽस्मिन्नेव श्लोकोक्ताऽप्रकारायुक्तिः साप्रकटीकृत्यदर्श्यतेनेनदर्थं मदीयश्लोकः॥हतेवर्गोत्पादकेनवर्ग भाशा
सहस्रकैः॥भक्तेफलंभवेत्स्वस्वाकारक्षेत्रस्यतत्वतः॥ अस्यार्थः।वर्गोत्पादकशब्देन॥अर्धीषिभाग्वेरित्यादयः॥एतैःस्वस्व
॥क्षेत्रव्यासवर्गःनिहत्यदशसहस्रैर्भक्तश्चेत्फलंभवतीत्यर्थः।तत्वतइत्यनेनसूक्ष्मव्यासवर्गग्रहणेनात्पर्यस्यस्पष्टार्थमुदाहरणंलिख्यं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥तत्ररत्नकुंडव्यासवर्गः॥७३३।३।१८५४ अनेनगुणितोजातः५७५९९२७ अयंदशसहस्रैर्भक्तः५७६ इदमेकहस्तरत्नकुंडफलं
।एवमेवहस्तद्वयादौ॥अर्धचंद्रवर्गः॥१४६६।६॥३९७२ अनेनगुणितोजातः५७५९९२७।दशसहस्रैर्भक्तः॥५७६॥योनिकुं
डेवर्गः॥९१५।१।७।६२९३।४॥अनेनगुणितोजातः॥५७६००२८॥दशसहस्रैर्भक्तः॥५७६॥त्र्यस्रव्यासवर्गः॥१७७३॥५।३२४७
।४॥अनेनगुणितोजातः॥५७ ५९ ४७॥दशसहस्रैर्भक्तः॥५७६॥चतुरस्रव्यासवर्गः११५२।५०००अनेनगुणितोजातः ॥
५७६००००॥ दशसहस्रैर्भक्तः॥५७६॥पंचास्रव्यासवर्गः९६९॥५९ ४४१२॥अनेनगुणितोजातः॥५७५९९७८।दश
सहस्रैर्भक्तः॥५७६॥षडस्रव्यासवर्गः॥८८६।६।६।५।६४९५॥अनेनगुणितोजातः॥५७५९९४८दशसहस्रैर्भक्तः५७६॥
सप्तास्रव्यासवर्गः।८४१।७॥६८४१॥अनेनगुणितोजातः॥५७५९२६॥दशसहस्रैर्भक्तः५७६।अष्टास्रव्यासवर्गः॥ ८
१४।४॥७९७॥अनेनगुणितोजातः५७५८३३९अयदशसहस्रैर्भक्तः५७६एवमेवद्विगुणितादावितिसंक्षेपः॥ १३॥
इष्टव्यासमितैर्भुजैःसमचतुष्कोणंविधायांकयेत्कर्णार्धेऽर्धमुखंसतोपरदिशिश्रोत्रेप्युदक्चांततः
।मूलंद्यादिगुणेफलेवदनतः पार्श्वार्धपुच्छंसतः पार्श्वेर्धेर्धमुखेकटौद्विगुणितेकर्णोच्चपार्श्वेदले।१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुं०टी० अथद्दिगुणितादौकर्त्तव्येगणितानभिज्ञानांसुगमार्थंसुलभप्रकारमाह॥ ॥इष्टव्यासोव्यासस्त्वेष्टव्यासः ॥इष्टव्यासेयेमिताः॥
१७ ॥इष्टव्यासमिताःतैःइष्टव्यासमितैःइष्टव्यासकेवृत्तेकृतेतस्मिन्वृत्तेयेमिताःगणिताः॥ अस्मद्वृत्तेत्रिभुजाः चतुरस्रवृत्तेचतुर्भु
जाइत्यादयः॥तादृशभुजैस्सैमंचतुरस्रंविधायवक्ष्यमाणचिह्नादिकर्तव्यंयद्वासमचतुष्कोणमिस्तुतयावृत्तस्थचतुरस्रभुजैस्ते
वग्रहणं॥ तादृशचतुरस्रेवक्ष्यमाणंकार्यं॥ अथवाइष्टव्यासेनमिताः॥ इष्टव्यासप्रमाणकाइत्यर्थः॥अयमेवार्थउचितः॥
पूर्वत्रलक्षणापातात्॥ अतएवरघुवीरदीक्षितैरपिगृहीतः अत्रप्रथमकल्पेभुजाएवआयांति ॥द्वितीयकल्पेवृत्तस्थचतुर
स्रमेवायाति॥तस्ययःकर्णःतन्मूलसूत्रं ॥तृतीयकल्पेव्यासएवायाति॥एतन्मध्येयथारुचिसमचतुष्कोणंनिधायांकयेत
॥ चिह्नानिकुर्यात् ॥दक्षिणांसादपरदिशिदक्षिणबाहौकर्णार्धमितदेशेचिह्नंकार्यं॥तदर्धसंज्ञं॥मुखादर्धपरिमितसूत्र
णद्वितीयचिह्नंकार्यं॥तदर्धमुखसंज्ञं ॥दक्षिण्यंउदग्ंसउत्तरस्यांदिशिश्रोत्रमितदेशेह्नंकार्यं॥सततसोतेनउदगंसतउत्तर
स्यांदिशीत्यर्थोलब्धः॥उदक्चांसततइत्रादक्यदस्यतंत्रनाज्ञानव्याचकारेणोत्तरत्रांसंपदेउदक्पदस्यानुवृत्तिर्ज्ञातव्यार रा०म०
अत्रपूर्वोक्तांसपदेनदक्षिणांसाच्छ्रोत्रमितदेशोंकनेसिद्धश्चेदुदक्चांसप्रइत्यत्रांसपदंव्यर्थंसत्ज्ञापयति॥चतुष्कोणवि १७
धायांकयेदित्यनेनचतुरस्राद्बहिरंकनाप्राप्तःप्रतिषेधति॥ननूत्तरांसाच्छ्रोत्रमितदेशेचिन्हकरणंसाधयति॥अतए

वात्रांसपदस्योदगंसपरत्वमित्यपि सुवचं। न च चतुरस्राभ्यंतरे श्रोत्रमितदेशस्यासंभवेनार्थाद्दृहिरंकनसिद्धानाप्राप्तिरिति वाच्यं॥ उदक्पदापरपदयोर्वैयर्थ्यापत्तेः अर्थसिद्धस्सर्वत्रसमत्वात्॥ एवं चतुष्कोणविधानस्यापि वैयर्थ्यात्॥ कोटिभुजाभ्यामेव प्रकृतार्थसिद्धेःसत्वात्॥ तस्माद्दक्षिणांमिलित्वा॥ यथा श्रोत्रमितदेशे चिह्नं भवति तथा कार्यमिति सिद्धं॥ अत्रोदग्गृहणेनैव पूर्वो दक्षिणांसइति सिद्धं॥ पूर्वोक्तानि मुखादिसंज्ञकानि तान्यपि कार्याणि॥ तत्र मुखात्पार्श्वावधिसूत्रं द्विगुणितं द्विहस्तमूलं॥ मुखादर्धावधिसूत्रं द्विगुणितं त्रिहस्तमूलं॥ मुखात्पुच्छावधिसूत्रं द्विगुणितं चतुर्हस्तमूलं॥ उदगंसतः पार्श्वावधिसूत्रं द्विगुणितं द्विहस्तमूलं॥ उदगंसतः अर्धावधिसूत्रं द्विगुणितं षड्ढस्तमूलं॥ उदगंसतः अर्धमुखावधिसूत्रं द्विगुणितं॥ सप्तहस्तमूलं॥ उदगंसतः दक्षिणश्रोण्यवधिसूत्रं द्विगुणितमष्टहस्तमूलं॥ श्रोत्रपरिमितदेशे चिह्नात्पार्श्वावधिसूत्रं द्विगुणितं नवहस्तमूलं॥ पुनस्तस्मादेव चिह्नादर्धावधिसूत्रं द्विगुणितं दशहस्तमूलं॥ अत्र न त्कस्योर्योगपदं कर्णइत्यनेनैव सर्वत्रा ज्ञेयं॥ यथा॥ मुखाद्दक्षिणांसो द्वादशांगुलः दक्षिणांसात्पार्श्वोपि द्वादशांगुलः। उभयोःकृत्योर्योगः।२८८ अस्यमूलं।१६।९६ एवमस्याकृति।१४४ द्वादशांगुलस्यकृतिः१४४ एतयोर्योगः४३२ अस्यमूलं२०।६।२८ इदं त्रिहस्तं सूत्रं पुनरस्यकृतिः४३२ द्वादशांगुलकृतिः।१४४।योगः५७६ मूलं२४ इदं द्विगुणितं चतुर्हस्तसूत्रं। अस्य कृतिः५७६। द्वादशांगुलकृतिः।१४४।योगः७२० अस्य मूलं२६।६।५ द्विगुणितं पंचहस्तमूलं। एवं भुजस्य चतुर्विंश

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यंगुलात्मकत्वात्तस्यकृतिः५७६कोटिस्तुकर्णार्द्धे परिमिता१६।७।६ अस्यकृतिः।२८८।एतयोर्योगः।८६४ अस्यमूलं।२९।३।१।५।
इदंद्विगुणितंषड्ढस्तमूलं।एवंत्रिपाल्हत्रस्यकृतिः४३२ भुजस्यकृतिः५७६ योगः१००८ अस्यमूलं३१।४६।इदंद्विगुणंसप्तहस्तमूलंभु
जकृतिः५७६ कोटिकृतिः।५७६।योगः११५२ अस्यमूलं३३।७४ इदंद्विगुणमष्टहस्तेमूलं।अस्यवर्गः।११५२ द्वादशांगुलकृतिः१४४
एतयोर्योगः१२९६ अस्यमूलं३६ इदंद्विगुणंनवहस्तमूलं॥एवंकर्णवर्गः११५२ दलवर्गः२८८ अनयोर्योगः१४४० अस्यमूलं॥३७।७।
५ इदंद्विगुणंदशहस्तमूलं॥ननुएकहस्तस्यभुजः।२४॥सैवकोटिः२४।एतयोःकृतिः।५७६॥५७६॥ योगः११५२॥ पदं३३।७४।
कर्णः।इदंद्विहस्तमूलं॥एवमस्यकृतिः११५२ कोटिस्तुपूर्वैव२४ तस्याअपिकृतिः॥५७६॥योगः॥ १७२८॥ अस्यमूलं॥॥
४१।४४॥इदंत्रिहस्तमूलसूत्रंएवंपूर्वाकोटिःसर्वत्रभुजस्तुयःपूर्वेकर्णरूपेणागतःसएव॥एवंतस्ययःकर्णःसभुजःकोटि
स्तुपूर्वैव॥एवंरीत्यायावद्विवक्षितंतावत् कर्तव्यमितिलाघवेनसिद्धौपुनराचार्यैर्गुरुभूतायुक्तिःकिमर्थंस्वीकृतेतिचेन्न॥
स्थूललाघवादितिसंक्षेपः॥ १४ ॥अथपूर्वव्यासादिभुजाउक्तास्तेषामुत्पत्तिंसर्वक्षेत्राणांफलंपूर्वेयथोक्तिभाष्यादयोभाज

स्युर्वृत्तव्यासवर्गात्त्रिउयम४कुचरणाभांश२७खाब्ध्य८।४०शायुक्तोरामाग्न्यांशैःशरांशोनग७कुलववियुक
अस्रतोबाहुवर्गाः॥ दोघ्नंदोर्व्यासकृत्योःखपदमितिफलंस्याच्चतुर्णांत्रिदोष्णांपादघ्नीहन्तदोष्णामिति
मितिमवदच्छंकरोनैलकंटिः॥१५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काउक्तास्तेषामुत्पत्तिंचाह॥व्यासवर्गस्यचरणत्रयंत्र्यस्रदोर्वर्गः व्यासः४२।१ अस्यवर्गः १७७३।५ अस्यत्रयश्चरणाः १३३०।१।६। अस्य
मूलं३६।४। चरणद्वयंचतुरस्रभुजवर्गः।तत्रव्यासवर्गः ११५२ अस्यचरणद्वयं५७६। अस्यमूलं२४ एकःचरणःषडस्रदोर्वर्गः।तत्रव्या
सवर्गः ८८६।६।५ अस्यचरणः२२१।६।४ अस्यमूलं१४।७ व्यासवर्गस्यसप्तविंशत्संख्यगुणाष्टशः।सएवपंचास्रदोर्वर्गः॥तत्रव्या
सवर्गः ९६९ अस्यत्र्यंशः३२३ अस्यसप्तविंशसंशः॥१२॥ अनेनयुक्तत्र्यंशः ३३५ अस्यमूलं१८।२।३ व्यासवर्गस्यचत्वारिंशदंशयुक्तो
यःसप्तमांशः।अष्टास्रदोर्वर्गः।तत्रव्यासवर्गः ८१४।४॥ अस्यसप्तमांशः ११६।३॥ अस्यचत्वारिंशदंशः ३ अनेनयुक्तःसप्तमा
शः॥ ११९।३ अस्यमूलं १०।७।५ व्यासवर्गस्यपंचमांशःस्वसप्तदशांशेनोनःसप्तास्रदोर्वर्गः।तत्रव्यासवर्गः।८४३।७ अस्य
पंचमांशः १६८।३ अस्यसप्तदशांशः ९।७।१ अनेनोनःपंचमांशः १५८।३।६ अस्यमूलं।१२।५ अथफलानयनं।दोर्व्याससक्तयोर्यदंत
रंतस्ययन्मूलं।तद्दोर्घ्नं कृतंचेत् चतुर्णांत्रिदोस्रांफलंभवति।तस्यैवपादादिरद्ध्यापंचास्रादीनांफलं।अर्थात्यादन्यूनंत्र्यस्रफलंभव
ति-नन्व त्रपादर्ध्योक्त्यैवचतुर्णांत्रिदोस्रांफलंभवतीतिस्यष्टतयासिद्धत्वाच्चतुर्णामितिवचनंव्यर्थमितिचेन्नानसार्थीतरत्वात-त
थाहि॥अत्रदोर्व्याससक्तयोर्यदंतरंतस्ययन्मूलं।तद्दोर्घ्नंकार्यं।तदाचतुर्णांत्रिदोस्रांफलंभवति।तेनकिंसिद्धं॥गर्भसूत्रेणभुजोगुणि
तश्चेच्चतुर्णांत्रिदोस्रांफलंभवति।एतेनवृत्तादौव्यासार्द्धेनैवपरिधिचतुर्थभागोगुणितश्चेत्सर्वक्षेत्रफलंभवतीतिफलितोर्थः॥
तदर्थमुदाहरणं॥वृत्तव्यासः २७।०।६ अस्यद्वाविंशतिघ्नेविहृते थयशैर्नैः।स्थूलोपिवास्याद्व्यवहारयोग्यइत्युक्तरीत्यापरिधिंप्रसा

ध्म ८५।१।१ अस्य चतुर्थभागः २१।२।२।२ अनेन व्यासो गुणितः ५७६।५।४ अधिकं ध्वजायसिध्यर्थं। अर्धचंद्रक्षेत्र व्यासः ३८।२।२ अस्य
परिधिः १२०।३ अस्य चतुर्थांशः ३०।०६ अनेन व्यासो गुणितः ११५२।२।०७ इदं समग्रवृत्तफलं। अस्यार्धमर्धचंद्रफलं। ५७६।२॥ योनिकुंडे
व्यासवर्गः ९१५।१।७॥ अस्य त्रयश्चरणाः ६८६।३।४ अस्य मूलं २६।२ अयमेव योनिकुंडगतत्र्यस्रभुजः अस्य वर्गः ६८६॥३॥४।
व्यासवर्गः ९१५।१।७ अनयोरंतरं २२८।६॥३ अस्य मूलं १५।१ इदं गर्भसूत्रं। योनिकुंडगतत्र्यस्रपरिधिः।७८।६ अस्य चतुर्थभागः।
१९।५।४॥ अनेन गर्भसूत्रं गुणितं सज्ञातं फलं॥२९७।६॥ अत्र त्र्यस्रचतुष्टयसाम्यसत्वाद् स्वत्र्यंशेनेदं युक्तं कार्यमिति त्र्यंशः ९९।२
अनेन युक्तं सज्ञातं ३९७॥ अथ वृत्तार्धद्वयफलं॥ तत्र व्यासः १५।१ अस्योक्तरीत्या परिधिः ४७।४।२ अस्य चतुर्थांशः ११।७ अनेन
व्यासो गुणितः॥१७९।५ इदं पूर्वफले योजितं सज्ञातं ५७६।५। अथ त्र्यस्रफलानयनं॥ तत्र व्यासवर्गः।१७७३।५॥ अस्य त्रयश्च
रणाः॥१३३०।१।६॥ अस्य व्यासवर्गस्य चांतरं॥४४३।३।२ अस्य मूलं २१।०।५ इदं गर्भसूत्रं। त्र्यस्रपरिधिः १०९।४॥ अस्य चतुर्थांशः॥ २७
।३ अनेन गर्भसूत्रं गुणितं सज्ञातं फलं॥५७६।४।५ अथ चतुरस्रव्यासवर्गः॥ ११५०२ अस्य द्वौ चरणौ॥ ५७६ अस्य मूलं २४ इदं गर्भ
सूत्रं चतुरस्रपरिधिः॥ ९६ अस्य चतुर्थभागः २४ अनेन गर्भसूत्रं गुणितं सज्ञातं फलं ५७६॥ पंचास्रव्यासवर्गः ९६९ भुजवर्गः
३३५ अस्य व्यासवर्गस्य चांतरं ६३४ अस्य मूलं॥२५।१।४।२॥ इदं गर्भसूत्रं पंचास्रपरिधिः ९१।४ अस्य चतुर्थांशः २२।५ अनेन
गर्भसूत्रं गुणितं सज्ञातं फलं।५७६।२ षडस्रव्यासवर्गः।८८६। भुजवर्गः।२२१।५।४ अस्य व्यासवर्गस्य चांतरं ६६५।११ अस्य मू

लं।२५।६।२।५। इदं गर्भसूत्रं।षडस्रपरिधिः ८९।२ अस्य चतुर्थांशः २२।४ अनेन गर्भसूत्रं गुणितं सञ्जातं फलं ५०५।३।५ अल्पांतरत्वा
ददोषः सप्तास्रव्यासवर्गः ८४१।०भुजवर्गः १५८।३।६। अस्य व्यासवर्गस्य चांतरं ६८३।३।२ अस्य मूलं २६।१। इदं गर्भसूत्रं सप्तास्रप
रिधिः ८८।३। अस्य चतुर्थांशः।२२।०।६। अनेन गर्भसूत्रं गुणितं सञ्जातं फलं ५७०।४ अल्पांतरत्वाददोषो ध्वजायसिद्धिः अष्टा
स्रव्यासवर्गः।८१४।४ भुजवर्गः।११९।३ अस्य व्यासवर्गस्य चांतरं ६९५।१ अस्य मूलं।२६।२।४ इदं गर्भसूत्रं॥ अष्टास्रपरिधिः
८७।५५। अस्य चतुर्थांशः २१।७।२ अनेन गर्भसूत्रं गुणितं सञ्जातं फलं ५७६।३।२ फलोन्नयने मुख्यप्रकारस्तु।भुजेन गर्भसूत्रं गुणनी
यं तेन चतुर्णां त्रिदोष्णां फलं भवति।यथासंख्यपादार्ध्यासंपूर्णफलं भवति। अन्यथा पादार्धीकरसंभवापत्तेः।न च चतुर्णां त्रिदो
ष्णा मित्यस्य वैयर्थ्यापत्तिस्तुनादवस्थैवेति वाच्यम्॥ तस्य हस्तकुंडसार्थमन्यात्। अथात्वोषि भाष्यादयो भाजका उक्ता स्ते
षामुत्पादनयुक्तिरुच्यते। अत्र वृत्तव्यासः शतांगुलपरिमितः।व्यासस्य वर्गो मनवाग्निनिघ्नः सूक्ष्मं फलं पंचसहस्रभक्तेइत्युक्तरीत्या
फलं॥ तदेव भाजकः।व्यासः।१०० अस्य वर्गः १०००० अयं मनवाग्निनिघ्नः ३९२७०००० पंचसहस्रभक्तः॥ ७८५४॥ अयमेव वृत्त
कुंडस्य भाजकः॥ अयमेवार्धितो ईचंद्रस्य॥ अत्रेतु। व्यासस्य नवमांशः ११।१। इदमष्टगुणितं तृतीयवृत्तं॥ ८९॥ तथा वधिव
लयं॥ ११।१।१। अस्य नवांशः॥४।३। अस्य योगः॥ ११५।४। अथ तृतीयवृत्तस्याष्ट भुजानां मानं रद्विद्विनंदेषुसागरैर्वृत्तव्या॥।
स्पे समोहते। खखखाभ्राकं संभक्तेलभ्यं ते क्रमशो भुजा इत्युक्तरीत्या भुजो भवति। तत्र व्यासः ८९ द्विद्विनंदेषुसागरै ४५९ २२ गु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णितोजातः।४० ८७०५८।१२००००। अनेनभक्तः सञ्जातो भुजः ३४। अयं द्विगुणितः ६८ अनेनावधितव्यासो गुणितः २१५।४ सिद्धोन
तः ७८५४ अयमेव पद्मकुंडव्यासोत्पादकः। अथ अस्त्रस्य। व्यासवर्गः १०००० व्यासार्धवर्गः ५०० अनयोरंतरं ७५०० अस्य मूलं। ८६।
४।६।४ अयमेव अस्त्रभुजः। अथ भुजवर्गः ७५००। अस्य चतुर्थांशः १८७५। अयं त्रिगुणितः ५६२५ अस्य मूलं ७५ अयं लंबः अत्र सम
अस्त्रत्वाद्भुज एव भूमिः। भूम्यर्धं।।४३।२।३।२। इदं लंबगुणितं सञ्जातं फलं ३२४७।४ योनौ तु। भूम्यर्धं शेनेन गुणितं अस्त्रद्वयफलम्।।
४३३० अथ वृत्तार्धद्वयफलं। तत्र व्यासवर्गः २५०० अयं भनवाग्निनिघ्नः ९८१७५०० पंचसहस्रभक्तेः १९६३।४ इदं पूर्वफले योजितं सञ्जा
तं योनिफलं ६२९३।४ चतुरस्रे व्यासार्धवर्गयोर्योगः। तत्र व्यासार्धवर्गौ। २५००।।२५०० अनयोर्योग एव चतुरस्रफलं।। ५०००।। ।।
पंचास्रे।। व्यासवर्गः।। १००००। अस्य तृतीयांशः ३३ ३३।३ अस्यापि सप्तविंशत्यंशः १२३।४ अनेन युक्तस्तृतीयांशः।३५।। ५६ ।।
७अस्य मूलं पंचास्रभुजः ५८।६।३ अथ ज्याव्यासवर्गयोरंतरं। ६५ ४३।१ अस्य मूलं ८०।७।१ इदं गर्भसूत्रं। पंचास्रपरिधिः २९४। अ
स्य चतुर्थांशः ७३।४। अनेन गर्भसूत्रं गुणितं सञ्जातं फलं। ५९४४।२।। षडस्रे ज्याव्यासवर्गांतरमूलं ८६।४।६।४ इदं गर्भसूत्रं इद
मेव षडस्रपरिधि चतुर्थांशेन गुणितं सञ्जातं फलं ६४९५ सप्तास्रे। व्यासवर्गस्य पंचमांशः २००० अयं स्वसप्तदशांशोनः।।
१८८२।३ अस्य मूलं सप्तास्रभुजः। ४३।३।३।१ ज्याव्यासवर्गांतरं। ८१२८। अस्य मूलं गर्भसूत्रं। ९०।०।६ सप्तास्रपरिधिः ३०३।
५।७। अस्य चतुर्थभागः ७५।७।४ अनेन गर्भसूत्रं गुणितं सञ्जातं फलं। ६८४१।। अष्टास्रे। व्यासवर्गस्य सप्तमांशः।।१४२८ ।।



For Private and Personal Use Only

॥४।४।अस्य चत्वारि शरंशाः ३५।५।६।अनेन युक्तः सप्तमांशाः १४ ६।४।२५ अस्य मूलं मष्टाम्बुजः ३८।२।१ अथ ज्याव्यासवर्गान्तरं ॥
॥८५३५।५।अस्य मूलं गर्भसूत्रं ९२।३।१ अष्टांस्य परिधिः ३०६।१।१ अस्य चतुर्थांशः ७६।४।२ अनेन गर्भसूत्रं गुणितं सञ्जातं फलं
७०७१३ मानिष्टनाड्यष्टांशांतानि फलानि स्वस्वक्षेत्राणामयुतगुणोष्ट फलस्य भाजकानि भवंति॥इति मितिमवदच्छंकरो नैलकंठिः॥
नीलकंठापत्यं पुमान् नैलकंठिः।नैलकंठिः शंकरनामा अनेनोक्तप्रकारेण मितिं मानं ॥ अवदत्। उक्तवान्। नन्वत्र नीलकंठपितर
मनुसरन्च्छंकरो वक्ति कुंडमित्यनेन शंकरपदस्य कर्तृत्वे सिद्धे पुनः शंकरो नैलकंठिरिति किमर्थो पुनरुक्तिः॥न च वक्तीति क्रि
यापदस्य कर्त्राकांक्षायां तत्र शंकरपदस्य तत्पूरकत्वेन तत्रैव चारितार्थ्यादत्र मिदंरिति क्रियापदस्यापि कर्त्राकांक्षायां
शंकरो नैलकंठिरिति पदस्य तदाकांक्षायां पूरकत्वान्न पुनरुक्तिरिति वाच्यं।अत्र शंकरो नैलकंठिरिति पदस्यासत्वेन पूर्वकर्तृ
वाचकपदेनैवात्रापि निर्वाहादिति चेन्न॥तस्य मंगलार्थत्वात्॥तदुक्तं महाभाष्ये।मंगलादीनि मंगलमध्यानि मंगलांतानि च
शास्त्राणि प्रथंते वीरपुरुषाण्यायुष्मत्पुरुषकाणि चेति।न चास्मिन्ग्रंथे मंगलध्यत्वं नास्तीति वाच्यं ॥वेदास्त्रमिति पद्ये वेदश
ब्दस्य मंगलवाचित्वात्॥तस्य ग्रंथमध्यत्वात् इत्यलं बहुना॥ १५ ॥अथ प्रसंगात्कुंडमेखलानां व्यासा उच्यंते ॥ तदर्थं गु
रुचरणोक्तिः॥ज्याव्यासवर्गान्तरमंगुलमक्ताद्व्यासात्प्रलब्धेन तु मेखलानां।स्तुतिर्गुणेद्व्यासयुतो भवेन हृतेः प्रमाणं खलु मेख
लानां।अस्यार्थः।ज्यावर्गव्यासवर्गयोरंतरं॥तस्य मूलं।अर्थाद्गर्भसूत्रं।तेन व्यासो भक्तो यत्लब्धं भवति।तेन मेखलानां विस्तारे गुण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येत्॥ स एव विस्तारः॥ स्वकीय व्यासयुक्तः कार्यः। स एव मेखलानां व्यासो भवतीत्यर्थः। तुल्ययुक्तित्वात्कंठस्यापि॥ उदाहरणं। वितार्धचं
द्रयोरित्थं प्रकारो नास्ति। तत्र गर्भसूत्रव्यासस्यैवैक्यात्॥ योनिकुंडे तु त्र्यस्रकस्य त्वाद्व्यासार्धमेव गर्भसूत्रं १५।१ अनेन व्यासो भक्तो ऽत्र लब्ध
ध्ध्रं २॥ इदं कंठव्यासार्धे द्विगुणीकृतं।४। व्यासे योजितं ३४।२ अयं कंठव्यासः। प्रथममेखलार्थे दशगुणितं।२०। व्यासे योजितं॥
।५०।२ द्वितीयमेखलार्थे षोडशगुणितं।३२। व्यासे योजितं ६२।२ तृतीयमेखलार्थे विंशतिगुणितं ४० व्यासे योजितं ७०।२ तत्रापि द्व
त्वार्द्धहस्तयुक्ते नैव कर्तव्यमिति विशेषः। एवं गुणनं सर्वत्र। गुण्यस्तु पृथक् पृथग्दर्श्यते। त्र्यस्रगर्भसूत्रं।२१।०।४। अनेन भक्त
व्यासाल्लब्धं २। कंठादिव्यासाः।४६।१।६२।१।७४।१।८२।१। चतुरस्रगर्भसूत्रं २४ अनेन व्यासभक्ते लब्धं।१।३।१।५।२। कंठादिव्यासाः
३६।५।७।२।४।४७।७।४।४।४।५६।२।६।४।६१।७।५।१। पंचास्रगर्भसूत्रं २५।१।४।२। अ०।१।१।७। कंठादिव्यासाः ३३।४।६।४३।३।६।
५०।७।५५।६।४। षडस्रगर्भसूत्रं २५।६।२।५ अनेन व्यासभक्ते लब्धं।१।१।१।६।४ कंठादिव्यासाः ३२।०३।५।४१।२।३।१।४८।१।५।५२।६
।४।२। सप्तास्रगर्भसूत्रं २६।१ अनेन व्यासभक्ते लब्धं १०७ कंठादिव्यासाः ३१।१।६।४०।०।६।४६।६।५१।१४॥ अष्टास्रगर्भसूत्रं ॥
२६।२।४॥ अनेन व्यासे भक्ते लब्धं।१।०।५।२।४। कंठादिव्यासाः ३०।५।२।५।३६।२।५।१।४५।६।५।५०।१।२।२। सर्वपंचमेखलापक्षे
यो ज्यमिति दिक्॥ पद्मकुंडे ।उपांतिमांतिमो व्यासौ द्विघ्नकंठादिमाननः॥ संबंध्य पूर्ववत्स्वात्कुर्याद्वृत्तान्यंतत्र कर्णिनु॥ अस्या
र्थः॥ उपांतिमो व्यासः अंतःपत्रस्थाहत व्यासः। अंतिमः आवधिवलयं व्यासश्च तौ द्विगुणितेन कंठमानेन एवं मेखलामानेन संबध्यं तद्वृ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाभ्यां पूर्ववत्त्रिकोणपूर्वकं अंतर्ज्यवहिर्ज्यं धनुरुत्याद्नेनपत्राणि कुर्यादितिकंठव्यासो॥२६।३२॥समेखलायाः ३४॥४१।३॥
द्वितीयमे॰ ४०।४७।३॥तृतीयमे॥४४।५०।२॥जड्येइत्युपनाम्नश्च भास्करस्य प्रसादतः॥कृत्तानन्तनयेनेहटीका कुंडार्कपद्मिनी
॥ इति श्रीजड्योपनामककृष्णेनकृता कुंडार्कटीका समाप्ता॥ श्रीमदभिमानिनीदेवतार्पणमस्तु॥ श्रीरस्तु ॥ शुभमस्तु॥ ॥
संवत् १९३७॥ ॥शाके ॥ कातीककृष्ण॥ ११ शुक्र ॥शुभम्भूयात्॥ ॥ श्रीरस्तु०॥ ॥ ॥
अथ धनुःफलकरणसूत्रमुदाहरणं च। जीवाकृतेश्चतुर्थांशः शरभक्तःशरान्वितः॥व्यासो भवेत्तदर्धेन चापार्धे गुणिते फले।१।विशरत्रि
ज्यका ज्यार्धघातेनोने धनुःफलं॥वृत्तार्धे धनुरर्धेन व्यासार्धे गुणिते फलं।२।उदाहरणं॥जीवा४।४शरः।०४।५।चापं४।५।४॥अत्र जी
वार्धं २।२।अस्य कृतिः।५।बाणाप्ता।८।५।१।४ शरान्विता९।१।६।४।अयं व्याससिद्धः।एतस्यार्द्धं।४।४।७।२।अनेनेदं।चापार्धं।२।२।६।
गुणितं फलं १०।६।४ अथ विशरत्रिज्यका।४।०।२।२।ज्यार्धं२।२।अनयोर्घातः।९।०।५।अनेनोनं व्यासार्धचापार्धगुणितफलं॥१।४॥
।७।इदं वृत्तार्धातिरिक्ते सर्वत्र धनुःफलं॥वृत्तार्धे तूदाहरणं॥धनुः।६०।१३॥अस्यार्धे। ३०।०५।४॥अनेनायं व्यासार्धो।१९॥१।४॥
गुणितः५।७६।०।६।२॥अधिकेन ध्वजायसिद्धिश्चेति॥ ...॥ ॥राम॥ राम०॥ ।शुभम्भूयात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुं॰टी
२२

॥इतिकुंडार्कटीकासहितसमाप्तः॥ राम॥ ६॥

राम
२२

For Private and Personal Use Only